प्रवेश सं० ७८५२ विषयः धर्मशास्त्रम् क्रम सं०

नाम आचारप्रदीपः ग्रन्थकार नागदेवोपाध्यायः

पत्र सं० ३-२०, २४-२६, २६-२९, २९-३२, ३८-४१.

श्लोक सं० अक्षर सं० (पंक्तौ) ३२. पंक्ति सं० (पृष्ठे) ११.

आकारः ९.६" x ४.१". लिपिः दे. ना. आधारः का.

वि० विवरणम् अपू०

12030

जि १४३७.

पी० एम० यू० पा०--५७ एम० सी० ई०--२६४१--५० ०००

Indira Gandhi National Centre for the Arts

प्र. हु. [illegible] नारदीय [illegible] द्वि. १४३७

हेपमतीत्याच्यधिकं भुवः ॥१॥ कृत्वा यज्ञोपवीतं तु पृष्ठतः कंठलंबितं । विण्मूत्रं तु गृ
ही कुर्याद्यद्वा कर्णे समाहितः ॥२॥ हारीतः । विण्मूत्रं तु हि कर्णस्थ आश्रमे प्रथमो नेमो । नि
वितः पृष्ठतः कुर्याद्वानप्रस्थगृहस्थयोः ॥३॥ उच्चारमैथुने चैव प्रस्रावे दंतधावने । स्ना
ने भोजनकाले च षट्सु मौनं समाचरेत् ॥४॥ अंगिराः । संध्ययोरुभयोर्जाप्ये भोजने दंतधा
वने । पितृकार्ये च दैवे च तथा मूत्रपुरीषयोः ॥५॥ गुरूणां संनिधौ दाने योगे चैव विशेषतः ।
एषु मौनं समातिष्ठन् स्वर्गं प्राप्नोति मानवः ॥६॥ उच्चैर्मूत्रपुरीषे तु दिवा कुर्यादुदङ्मुखः ।
दक्षिणाभिमुखो रात्रौ संध्ययोश्च यथा दिवा ॥७॥ छायायामंधकारे वा रात्रावहनि वा द्विजः
। यथासुखमुखः कुर्यात्प्राणबाधाभयेषु च ॥८॥ वाय्वग्निविप्रमादित्यमपः पश्यंस्तथै
व गां । न कदाचन कुर्वीत विण्मूत्रस्य विसर्जनं ॥९॥ न फालकृष्टे न जले न चित्यां न च प
तेन । न जीर्णदेवायतने न वल्मीके न शाड्वले ॥१०॥ न ससत्त्वेषु गर्तेषु न गच्छन्न पथि स्थि
तः । न नदीतीरमासाद्य न च भस्मनि न गोमये ॥११॥ शंखः । मूत्रपुरीषे नो कुर्यात्सोपानकः च

दावना। उद्धृत्य मृज्जलैः कुर्यात्त्रिस्त्रावमेहनं द्विजः॥१२॥ अपकृष्य च विण्मूत्रं काष्ठलोष्ठतृणा
दिना। उदस्तवासा उत्तिष्ठेद्दृढं विधृतमेहनः॥१३॥ इति नागदेवविरचिते आचारप्रदीपे
मूत्रपुरीषोत्सर्गविधिः। अथ शौचविधिः॥ तत्र दक्षः॥ शौचे यत्नः सदा कार्यः शौचमूलो द्विजो
त्तमः। शौचाचारविहीनस्य समस्ता निःफलाः क्रियाः॥१॥ अंतर्जलाद्देवगृहाद्वल्मीका
न्मुखकोत्करात्। कृतशौचावशिष्टाश्च न ग्राह्याः पञ्च मृत्तिकाः॥२॥ आहृता अन्यशौचा
र्थं वालुकां पांशुरूपिणीं॥ न मार्गान्नश्मशानाच्च नादद्यात्कुड्यतः क्वचित्॥३॥ यमः॥ आहरे
न्मृत्तिकां प्राज्ञः। कूला संसिक्ता तया। वापीकूपतडागेषु नाहरेद्ग्राह्यतो मृदं॥४॥ आह
रज्जलमध्यात्तु परितो मणिबंधनात्॥ शातातपः॥ शुचिदेशात्संग्राह्या शर्कराश्मादि
वर्जिता। रक्ता गौरी तथा श्वेता मृत्तिका त्रिविधा स्मृता॥६॥ यस्मिन्देशे तु ये विप्रा यस्मिन्त्रो 3
छेतु येन पाः। यस्मिन्देशे तु यन्मृत्स्यात्तस्मिन्सैव प्रशस्यते॥७॥ वसिष्ठः। एका लिंगे करे
तिस्र उभयोर्मृत्तिकाद्वयं। मूत्रशौचं समाख्यातं शुक्रे तद्द्विगुणं भवेत्॥८॥ दक्षः॥ पञ्चा

पाने दशैकस्मिन्नुभयोः सप्त मृत्तिका। एतच्छौचं गृहस्थस्य द्विगुणं ब्रह्मचारिणः॥९॥ वा
नप्रस्थस्य त्रिगुणं यतीनां च चतुर्गुणं॥१०॥ वसिष्ठः॥ अर्द्धप्रसृतिमात्रा तु प्रथमा मृत्तिका स्मृ
ता। द्वितीया च तृतीया च तदर्द्धा परिकीर्तिता॥११॥ लिंगेऽप्यत्र समाख्याता त्रिपर्वपूर्यते यया। दात
व्यमुदकं तावन्मृदभावो यथा भवेत्॥१२॥ माथुलः। तीर्थे शौचं न कुर्वीत कुर्वीतोद्धृतवारिणा।
रत्निमात्रं जलं त्यक्त्वा कुर्याच्छौचमनुद्धृते॥१२॥ पश्चात्तु शोधयेत्तीर्थमन्यथा ह्यशुचिर्भवे
त्। दक्षः। यद्दिवा विहितं शौचं तदर्द्धं निशि कीर्तितं। तदर्द्धमातुरे प्रोक्तं मातुरस्यार्द्धमध्वनि
॥१३॥ आदित्यपुराणे। स्त्रीशूद्रयोरर्द्धमानं शौचं प्रोक्तं मनीषिभिः। बालस्यानुपवीतस्य
गंधलेपक्षयावहं॥१४॥ वृद्धपराशरः॥ कृत्वाथ शौचं प्रक्षाल्य पादौ हस्तौ च मृज्जलैः।
निबद्धशिखकच्छस्तु द्विज आचमनं चरेत्॥१५॥ अरण्ये निर्जले रात्रौ चौरव्याघ्राकुले
पथि। कृत्वा मूत्रं पुरीषं च द्रव्यहस्तो न दुष्यति॥१६॥ इति नागदेवविरचिते आचारप्रदीपे शौ

Indira Gandhi National Centre for the Arts

च विधिः।अथ श्रोत्राचमन विधिः।तत्र योगीश्वरः॥ अंतर्जानुः शुचौ देश उपविष्ट उदङ्मु
खः।प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत्॥१॥कनिष्ठादेशिन्यंगुष्ठमूलान्यग्रं
करस्य च।प्रजापति पितृ ब्रह्म देवतीर्थान्यनुक्रमात्॥२॥कंठतालुगाभिस्तु यथासंख्यं द्वि
जातयः।शुद्धेरन्स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरंततः॥३॥संवर्तः।अशब्दाभिरनुष्णाभि
स्त्यक्ताभिः फेनबुद्बुदैः।आपक्वतानां शुद्धिः स्यादुत्तरेण तु पाणिना॥४॥बौधायनः।पादप्रक्षा
लन शेषेण नाचामेद्वारिणा द्विजः।शुद्धाभावे पिबेत्किंचित्त्यक्त्वा भूमौ ततो जलं॥५॥आपस्तं
बः।संध्यार्थे भोजनार्थे च पित्र्यर्थे वा तथैव च।शूद्राद्भृतेन नाचामेत्पादिहवनेषु च॥ ४
भरद्वाजः।संहितांगुलिना तोयं पाणिना दक्षिणेन तु।मुक्तांगुष्ठकनिष्ठाभ्यां शेषेणाचम
नं विदुः॥७॥दक्षः।प्रक्षाल्य पादौ हस्तौ च त्रिः पिबेदंबु वीक्षितं।संस्पृष्टांगुष्ठमूलेन द्विः
प्रमृज्यात्ततो मुखं॥८॥यमः।तावन्नोपस्पृशेद्विप्रो यावद्वामेन न स्पृशेत्।वामे हि द्वा
दशादित्या वरुणस्त्रिदशेश्वरः॥९॥दक्षिणेन स्थिततोयं तर्जन्यां सव्यपाणिना।नत्रो

यं स्पृशेत यस्तु सोमपानसमं स्मृतं॥मनुः।खानि चोपस्पृशेदद्भिरात्मानं शिर एव च।सं
हिताभिस्त्रिभिः पूर्वमास्यमुपस्पृशेत्॥११॥देशिन्यंगुष्ठयुग्मेन नासारंध्रद्वयं स्पृशेत्।अंगु
नामिकाभ्यां तु चक्षुः श्रोत्रे तु संस्पृशात्॥१२॥नाभिं कनिष्ठांगुष्ठाभ्यां हृदयं तु तलेन वै।अंगुल्य
लिभिश्च सर्वाभिः शिरो बाहू च संस्पृशेत्॥१३॥अनेनैव विधानेन आचांतः शुचितामि
यात्॥दक्षः।उदके चोदकस्थस्तु स्थलगस्तु स्थले शुचिः।पादौ स्थाप्योभयत्रैव आचांतः शु
चितामियात्॥१४॥स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्यापसर्पणे।आचांतः पुनराचामेत्तु
वासोभि परिधाय च॥१५॥अकृत्वा पादयोः शौचं तिष्ठन्मुक्तशिखोपि वा।विना यज्ञोपु
वीतेन आचांतोप्यशुचिर्भवेत्॥१६॥सोपानत्को कोष्णीषी पर्यंकासनयानगः।दुर्दै
शोऽपदस्थैव नाचामं शुद्धिमाप्नुयात्॥१७॥रथगो नरयानस्थो हस्त्यश्वारोहकस्तथा
।आचांतः कर्मशुद्धः स्यात्तांबूलौषधजग्धिकृत्॥१८॥अधोवायुसमुत्सर्गे आक्रंदे क्रो
धसंभवे।मार्जारमूषकस्पर्शे आचांतस्त्वशुचिर्भवेत्॥१९॥भुक्त्वा स्नानस्थोप्याचाम

Indira Gandhi National Centre for the Arts

चान्यकालेकदाचन।नपादुकास्थानत्वरयानचायज्ञोपवीतवान्॥२० आद्यायन-
दानमाचमनंहोमंभोजनंदेवतार्चनं।प्रौढपादोनकुर्वीतस्वाध्यायंपितृतर्पणं॥२१॥
आसनारूढपादस्तुजान्वोर्वाजंघयोस्तथा।कृतावसक्थिकोयश्चप्रौढपादःसउच्यते
॥२२ पाराशरः।क्षुतेनिष्ठीवनेचैवदंतोच्छिष्टेतथानृते।पतितानांचसंभाषेदक्षिणंश्रव
णंस्पृशेत्॥२३ अग्निरापश्चवेदाश्चसोमःसूर्योनिलस्तथा॥सर्वएवतुविप्रस्यकर्णेतिष्ठं
दक्षिणे॥२४ पुष्कराद्यानितीर्थानिगंगाद्याःसरितस्तथा।विप्रस्यदक्षिणेकर्णेतिष्ठंति
मनुरब्रवीत्॥२५ इतिआचारदीपेशौचाचमनविधिः।अथदंतधावनविधिः।तत्रदक्षः।
मुखेपर्युषितेनित्यंभवत्यप्रयतोनरः।तदार्द्रकाष्ठंशुष्कंवाभक्षयेद्दंतधावनं॥१ कंट
किक्षीरवृक्षोत्थंद्वादशांगुलमव्रणं।कनिष्ठिकाग्रवत्स्थूलंपर्वार्धकृतकूर्चकं॥२ स्मृतं
नरात्।जंबूदुंबरवृताश्चकदंबोशोकचंपकौ।बदरीतिंदुमाद्याश्चेत्प्रोक्तादंतप्रधावने॥३

वलं
सौभाग्यंवाकदंतबहलंलक्ष्मीस्तेजोदृढःश्रुतिः।क्रमान्मुंजस्वरंप्रोक्तंतदुमेधावनेभा
लं॥गर्गः॥दशांगुलंतुविप्राणां।क्षत्रियाणांनवांगुलंतु।अष्टांगुलंतुवैश्यानांशूद्राणां
सप्तमंमितं॥५ चतुरंगुलमानंतुनारीणांनात्रसंशयः॥विष्णुः।सुसूक्ष्महीनदंतस्य
समदंतस्यमध्यमं।स्थूलंविषमदंतस्यत्रिविधंदंतधावनं।अग्रेग्रंथिसत्वंवंशस्यकी
टकाग्निरदूषितं॥प्राङ्मुखस्तूपविष्टस्तुभक्षयेद्वाग्यतोज्वरः॥७॥गर्गः।प्राङ्मुखस्य
धृतिःसौख्यंशरीरारोग्यमेवच।दक्षिणेनतथाकष्टंपश्चिमेनपराजयः॥८ उत्तरेण
गवांनाशःस्त्रीणांपरिजनस्यच॥दंतधावनमंत्रो॥अन्नाद्यायव्यूहध्वं सोमोरा
जायमागमत्।समेमुखंप्रमात्स्यतेयशसाचभगेनच॥९ आयुर्बलंयशोवर्चःप्र
जाःपशूंश्चवसूनिच।ब्रह्मप्रज्ञांचमेधांचत्वंनोदेहिवनस्पते॥१० अन्वयोरन्यतमंजपेत्।
विष्णुः।प्रक्षाल्योदकशुचौदेशेदंतधावनमुत्सृजेत्॥११ पतितेत्वभिमुखेसम्यक्केनान्य
मान्यन्नीक्षितं।अभावेदंतकाष्ठस्यप्रतिषिद्धदिनेषुच॥१२॥अपांद्वादशगंडूषै

Indira Gandhi National Centre for the Arts

विदध्याद्दंतधावनं । चतुर्दश्यष्टमीदर्शपौर्णमासंक्रमेषु च ॥ नंदासु च नवम्यां च दं
तकाष्ठं विवर्जयेत् ॥ मनुः ॥ शनिरंगारकश्चैव रविशुक्रस्तथैव च । दंतानां काष्ठसंयो
गाद्दहत्यासप्तमं कुलं ॥ यमः ॥ श्राद्धे जन्मदिने चैव विवाहे जीर्णदूषिते । व्रते चैवोपवा
सेषु वर्जयेद्दंतधानं ॥१५॥ व्यासः ॥ शुद्ध्यर्थं प्रातरुत्थायचहृयेदंतधानं । श्राद्धे यज्ञे च नि
यमान्नाघात्प्रोषितचर्चिका ॥१६ नाद्यादजीर्णे वमथुः कासश्वासज्वरार्दितो । तृष्णास्य
पाकहृन्नेत्रशिरःकर्णामयी च यस्तत् ॥१७॥ वृद्धयाज्ञवल्क्यः ॥ इष्टकालोष्ठपाषाणैर्नेत
रंगुलिभिस्तथा । मुक्त्वा चानामिकांगुष्ठौ वर्जयेद्दंतधावनं ॥१८॥ व्यासः ॥ प्रतिपद्द
र्शषष्ठीषु नवम्यां दंतधावनं । पर्णैरन्यत्र काष्ठैस्तु जिह्वोल्लेखः सदैव हि ॥१९ पेठी ६
नसिः ॥ तृणपर्णोदकेनांगुल्या दंताश्चाचयस्माद्देशिनीवर्जं ॥ वराहः ॥ अज्ञानप्रवी
णि नदंतकाष्ठान्यघ्रात्वपत्रैश्च समचितानि । नयुग्मपर्णानि न पाटितानि नवो
ईगुष्ठाणि विना च चावा ॥२० मध्याह्नस्नानवेलायां न त्यजेद्दंतधावनं । निराशास्त

स्यगच्छंति देवताः पितृभिः सह ॥२१ इति दंतधावनविधिः ॥ अथ यज्ञोपवीतविधिः ॥
तत्र मनुः । कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृत् । स्थाने पवित्रसंख्या च षण्णव
त्यंगुलीषु तत् ॥१॥ त्रिवृदूर्ध्ववृतं कार्यं तंतुत्रयमधोवृतं । त्रिवृतं चोपवीतं स्यात्तस्यैको
ग्रंथिरिष्यते ॥२॥ सावित्र्या त्रिगुणं कुर्यान्नवसूत्रं तु तद्भवेत् । त्रिवृच्छिन्नमधोयातं तंतुक्रा
८ भ निर्मितमुत्सृजेत् ॥३॥ ॐकारश्चाग्निनागोऽथ सोमः पितृप्रजापतिः । वायुः सूर्यः स
र्वदेवा इत्याद्युक्तास्तु देवताः ॥४ यज्ञोपवीतधारणे मंत्रः ॥ यज्ञोपवीतं परमं पवि
त्रं प्रजापतेर्यत्सहजं पुरस्तात् । आयुष्यमग्र्यं प्रतिमुंच शुभ्रं यज्ञोपवीतं बलमस्तु
तेजः ॥५॥ स्नानादूर्ध्वमधोनान्तेन धार्यं च कथंचन । पृष्ठवंशे च नाभ्यां च धृतं यद्विंद
ते कटिं ॥६ तद्धार्यमुपवीतं स्यान्नातिनीचं न चोच्छ्रितं । ब्रह्मचारिण एकं तु स्नानात्प्रचरति
तद्द्वयं ॥७ तृतीयमुत्तरीयं तु वस्त्राभावे तदिष्यते । बहूनि चायुष्कामस्य धारयेत्सततं द्विजः ।

Indira Gandhi National Centre for the Arts

उपवीतमलंकारं स्रजं करकमेव च। उपानहौ च वासश्च धृतमन्यैर्न धारयेत्। मे
खलामजिनं दंडमुपवीतं कमंडलुं। अप्सु प्रास्य द्विनिष्ठानि गृहीत्वान्यानि मंत्रतः॥१०॥
इति श्री आचारदीपे यज्ञोपवीतविधिः। अथ दर्भविधिः। तत्र कात्यायनः॥ मासे नभस्य
मावास्या तस्यां दर्भोच्चयः स्मृतः। अयातयामास्ते दर्भा नियोक्तव्याः पुनः पुनः॥१॥
शुचौ देशे शुचिर्भूत्वा स्थित्वा पूर्वोत्तरामुखः। ॐकारेण मंत्रेण सकृदेव कुशान्नस्य
शातु॥२॥ सप्तपत्राः शुभा दर्भास्तिलक्षेत्रे समुद्भवाः। अछिन्नाग्रा अशुष्काग्राः प्रा प्रौः
देशाश्च प्रमाणतः॥३॥ कुतपा इति विज्ञेयास्तैस्तु श्राद्धं समाचरेत्। कुशोत्पाटनमं ७
त्रः। विरंचिना सहोत्पन्नः परमेष्ठिनिसर्गजः। नुद सर्वाणि पापानि मम स्वस्तिक
रो भव॥४॥ सुमंत्रः। कुशाः काशाः शिरो गंधा यवा दूर्वा ज बिल्वजः। गोकेशा मुंजो कुंद
ध्यपूर्वाभावे परः परः॥५॥ समूलाग्रौ विवर्ज्यौ तु कुशौ द्वौ दक्षिणे करे। सव्ये चैव तथा

स्मृ २

त्री१
त्रिणा बिभृयात्सर्वकर्मसु॥६॥ हारीतः। स्नाने दाने जपे होमे स्वाध्याये पितृतर्पणे। अशून्यं तु
करं कुर्यात्सौवर्णरजतैः कुशैः॥७॥ चतुर्भिर्दर्भपिंजूलैः पवित्रं ब्राह्मणे तु। एकैकं ह्रासयेत्पत्र
वर्णे वर्णे यथाक्रमं॥८॥ मार्कंडेयः। त्रिभिर्दर्भैः शांतिकर्म पंचभिः पौष्टिकं तथा। चतुर्भिश्चा
भिचारं च कुर्वन्कुर्यात्पवित्रकं॥९॥ वृद्धवसिष्ठः॥ दर्भैः पवित्रं विज्ञेयं ब्राह्मणस्य विशेषतः
। हेमरजतताम्राणि क्षत्रविट्शूद्रजातिषु॥१०॥ शंखः॥ ब्रह्मयज्ञे जपे चैव ब्रह्मग्रंथिर्विधी
यते। भोजने वर्तुलः प्रोक्त इति धर्मो न हीयते॥११॥ त्रिगुणीकृत्य रज्जुं तु त्रिरस्यासं नियोजयेत्।
ब्रह्मग्रंथिः स विज्ञेयः सदा मौंज्यादिकर्मसु॥१२॥ मूलपर्वणि कुर्वाणो महत्पाहीयते श्रियो॥
मध्ये पर्वणि कुर्वाणः पुत्रदारैर्वियुज्यते॥१३॥ अनामिकाग्रपर्वस्थं पवित्रं बिभृयात्सदा॥
अग्रपर्वग्रहणं काम्यजपविषयं॥ सपवित्रेण हस्तेन कुर्यादाचमनक्रियां। नोच्छिष्टं तत्प
वित्रं तु भुक्तोच्छिष्टं तु वर्जयेत्॥१४॥ कुशपूतं पिबेत्तोयं कुशमूलमुपस्पृशेत्। कुशाग्र
निस्सृतं तोयं सोमपानं दिने दिने॥१५॥ कुशमूले वसेद्ब्रह्मा कुशमध्ये जनार्दनः। कुशाग्रे

Indira Gandhi National Centre for the Arts

ब्रह्मसूत्रेणयेधृताः। पवित्रास्तांश्चविज्ञानीयाद्यथाकायस्तथाकुशाः॥१७

गांकरश्चैवकुशांस्तस्मात्तुधारयत्॥१६ नीवीमध्येस्थितादर्भाः ये चान्ये छेदितानखैः। ग्रंथि
तानग्निदग्धांश्चकुशान्यत्नेनवर्जयेत्॥१७ अपूतागर्हितादर्भा॥ ये चान्ये छेदितानखैः
कुवितानग्निदग्धांश्चकुशान्यत्नेनवर्जयेत्॥१८॥ हारितः। समित्पुष्पकुशादीनिब्राह्मणः
स्वयमाहरेत्। शूद्राहृतैः क्रियक्रीतैः कर्मकुर्वन्व्रजत्यधः॥१९॥ इत्याचारदीपे दर्भवि
धिः॥ अथप्रणवविधिः। तत्रकात्यायनः। ॐकारस्य ऋषिर्ब्रह्मा परमात्मा च देवता। गायत्री
च भवेच्छंदो नियोगः सर्वकर्मसु॥१॥ याज्ञवल्क्यः॥ अकारं चाप्युकारं च मकारं च प्र
जापतिः। वेदत्रयान्निरहरद्भूर्भुवः स्वरितीति च॥२ प्रणवाद्यास्तथावेदाः प्रणवाद्यं च
राचरं। वाङ्मयं प्रणवं सर्वं तस्मात्प्रणवमभ्यसेत्॥३॥ अकारः प्रथमामात्रा द्वितीयो
कारसंज्ञिता। मकारमात्रा च व्याख्यानादद्वा स्वव्यवस्थिता॥४ प्रथमाया भवेन्मात्रा रक्ता
स वब्रदेवता। जाग्रद्वृत्तौ स्थिता नित्यं विज्ञेया सा निरंजना॥५ द्वितीया च भवेन्मात्रा कृ
ष्णा वै विष्णुदेवता। स्वप्नवृत्तौ स्थिता नित्यं विज्ञेया सा निरंजना॥६ तृतीया या भवेन्मात्रा



शुक्ला वै रुद्रदेवता। सुषुप्तवृत्तौ स्थिता नित्यं विज्ञेया सा निरंजना॥७॥ त्रिमात्रस्तु प्रयोक्तव्या
आरंभे सर्वकर्मणां। तिस्रः सार्धास्तु कर्तव्या मात्रास्तत्त्वार्थचिंतकैः॥८ तैलधारामिवाच्छि
न्नं दीर्घघंटानिनादवत्। अवाच्यं प्रणवस्याग्रं यस्तं वेद स वेदवित्॥९ ऋग्वेदे स्वरितोदा
त्त एकाक्षर उदाहृतः। त्रयी स्वर्यं तातो दात्तो यजुर्वेदे स पठ्यते॥१० दीर्घप्लुतः सामवे
दे ॐकारस्तु न संशयः। संहिताप्रोदात्तमेवाकुरेकाक्षर उदाहृतः॥११ अथ वेदेषूद्दि
ष्ट ॐकारे नात्र संशयः। अकारेणायदोंकारः प्रविष्टस्त्वेकधा भवेत्॥१२॥ उवर्णसम
योगादोंकारः समपद्यते॥ अनुस्वारं मकारं तु ॐकारस्य शिरो यदा। प्रकृतिः साध
ने ह्यचाव्यंजनादौ तु लुप्यते॥१३॥ नपुंसकस्तथोंकारो वेदानां च प्रकीर्तितः। एवं य
विदित्वे विप्रो मुच्यते सर्वबंधनात्॥१४ स्वदेहमरणिं कृत्वा प्रणवं चोत्तरारणिं। ध्यान
निर्मथनाभ्यासादेवं पश्येन्निगूढवत्॥१५ प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्य
ते। अप्रमत्तेन बोद्धव्यं शरवत्तन्मयो भवेत्॥१६॥ ॐकारेण तथा ह्यात्मा ध्यात्वा देवं प्रस

Indira Gandhi National Centre for the Arts

एतदालंबनंज्ञात्वाब्रह्मन्यायक
दति।एतदालंबनंश्रेष्ठमेतदालंबनंपरं॥१७एतदालंबनंज्ञात्वाब्रह्मलोकेमही
यते॥अदृष्टविग्रहोदेवोभावग्राह्योनिरामयः॥तस्योंकारस्मृतंनामतेनाहूतप्रसी
दति॥१८तस्मादोमितिपूर्वंतुकृत्वाभुंजीततत्परं।ब्रह्मविघ्नेनविधिना सततंप्रति
पद्यते॥१९दृढः।कृत्वापर्यंकबंधंकरकमलपुटंन्यस्तमुत्संगदेशे।नासाग्रेध्यानयो ६
नचक्षुःस्थितन्यस्तपदंनिश्चलंस्वस्थकायः।ध्यायेदोंकारमेवंसततवतिसुकृतीयो
गमार्गानुसारीतत्त्वज्ञानेनसम्यक्त्रिभुवनमिदंमंडलंयातिनित्यं॥२०यो
जीश्वरः।सर्वमंत्राधिराजोयमोंकारोनात्रसंशयः।यन्न्यूनंचातिरिक्तंचयच्छि
द्रंपदवर्जितं॥२१यदामध्यमशुद्धंचयातयामंचयद्भवेत्।यदोंकारप्रयोगेणस
र्वंचाविकलंभवेत्॥२२साधनंसर्वकार्याणांयदोंकारेणसंमितं।सर्वमंगलमांग
ल्यंसर्वप्राणिमयंविभुं॥२३पावनंमोक्षदंपुण्यंसर्ववेदमयंविभुं।विदित्वामुच्यते

नरः।विस्तरेणानश
क्तिप्रजन्मसंसारबंधनात्॥२४एतत्संक्षेपतःप्रोक्तंप्रभावगुणवर्णनं।विस्तरेणानश
क्यतवक्तुंवर्षशतैरपि॥२५आचारप्रदीपप्रणविधिः॥अथशिखाबंधनविधिः॥त
त्रव्यासः॥स्मृत्वोंकारंचगायत्रीनिबध्नीयाच्छिखांततः।पुनराचम्यहृदयंबाहूस्कंधौ
चसंस्पृशेत्॥षट्त्रिंशन्मतात्॥मानस्तोकेतुमंत्रेणशिखाबंधंतुकारयेत्।जपहि
संतिविप्राणांरक्षाकर्मविवर्जितं॥योगी।येनक्रौताश्चयोलोकादानवाश्चवशीकृताः
सरणंसर्वभूतानांसमेविष्णुप्रसीदतु॥३॥इतिआचारदीपेशिखाबंधनविधिः॥
अथप्राणायामविधिः।तत्रस्मृत्यंतरं॥व्याहृतीनांतुसप्तानांऋषिर्दैवतमुच्यते।छं
दांसिविनियोगश्चकथिताधर्मपारगेः॥१॥विश्वामित्रोजमदग्निर्भरद्वाजोथगो
तमः।अत्रिर्वसिष्ठःकश्यपोमुनयःसप्तकीर्तिताः॥२॥गायत्र्युष्णिगनुष्टुब्बृहतीपं
क्तिरेवच।त्रिष्टुप्चजगतीचैवछंदांस्येतानिसप्तवै॥३॥अग्निर्वायुस्तथादित्योबृ
हस्पतिर्जलाधिपो।इंद्रश्चविश्वेदेवाश्चदेवतासमुदाहृताः॥४याज्ञवल्क्यः॥अग्नि

Indira Gandhi National
Centre for the Arts

रेवमुखं तस्याः विश्वामित्रऋषिस्तथा। सविता देवता चैव गायत्री त्रिपदा हि सा॥ व्यासः।
उमापोज्योतिरित्येष मंत्रो वै तैत्तिरीयके। तस्याः प्रजापतेरार्षं छंदो हीनयजुर्यतः॥६॥
ब्रह्माग्निर्वायुसूर्याश्च देवताः समुदाहृताः। प्राणस्यायमने त्वेव विनियोगः परिकी
र्तितः॥७ कात्यायनः॥ सव्यः सोपग्रहः कार्यो दक्षिणः सपवित्रकः। रक्षयेद्वारिणा
त्मानं परिक्षिप्य समंततः॥८ कूर्मपुराणादीश्वरगीतासु॥ प्राणः स्वदेहजो वायुरा
यामस्तन्निरोधनं। उत्तमाधममध्यत्वात् त्रिविधः प्रतिपादितः॥ मात्राद्वादशको मंद,
श्चतुर्विंशतिमात्रिकः। मध्यमप्राणसंरोधषट्त्रिंशन्मात्रिकोत्तमः॥१०॥ स्वदेहकं १०
पनोत्थानजनकत्वं यथाक्रमं। मंदमध्यममुख्यानां मानंदात्मोत्तमोत्तमः॥११ याज्ञव
ल्क्यः। अंगुष्ठांगुलिमोक्षात्त्रिर्जानुनं परिमार्जनं। तालत्रयमपि बुद्धा मात्रासंज्ञं प्रच
क्षते॥१२॥ देशकालानुसारेण मात्राः सेव्याः शनैः शनैः॥१३ स्मृत्यंतरात्॥ कलावि
द्भिः कलाप्रोक्ता विष्णुशब्दप्रमाणिकाः। अतः प्राणायामस्यादौ विष्णुशब्देन ग

ण्यते॥ दक्षिणे रेचयेद्वायुं वामेनापूरितोदरः। कुंभकेन धारयेन्नित्यं प्राणायामं विदुर्बुधैः
॥१५ पीडयेद्दक्षिणां नाडिमंगुष्ठेन तथेतरां। कनिष्ठानामिकाभ्यां च मध्यमां तर्जनीं त्यजेत्
॥१६ तथा च बृहस्पतिः। अनामिकाकनिष्ठा च अंगुष्ठश्च तृतीयकः। नासिकायां नियुंजीत त
र्जनीमध्यमां विना॥१७ कूर्मपुराणादीश्वरगीतासु॥ रेचकः पूरकश्चैव प्राणायामोथ कुंभकः
। प्रोच्यते सर्वशास्त्रेषु योगिभिर्यतमानसैः॥१७ रेचकोजस्र निश्वासः पूरकस्तन्निरोधतः।
साम्येन संस्थितिर्या सा कुंभकः परिगीयते॥१८ योगीयाज्ञवल्क्यः॥ नीलोत्पलदलश्यामं नाभि
मध्ये प्रतिष्ठितं। चतुर्भुजं महात्मानं पूरके चिंतयेद्धरिं॥१९ कुंभके तु हृदिस्थाने ध्यायेत कम
लासनं। ब्रह्माणं रक्तगौरांगं चतुर्वक्त्रं पितामहं॥२०॥ रेचके वीश्वरं ध्यायेल्ललाटस्थं महेश्वरं।
शुद्धस्फटिकसंकाशं निर्मलं पापनाशनं॥२१ पूरके विष्णुसायुज्यं कुंभके ब्रह्मणोंतिकं। रेचके
न तृतीयं तु प्राप्नुयादीश्वरं पदं॥२२ सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह। त्रिः पठेदायतः
प्राणः प्राणायामः स उच्यते॥२३ कूर्मपुराणादीश्वरगीतासु॥ स एव द्विविधः प्रोक्तः सगर्भो

Indira Gandhi National Centre for the Arts

गर्भएवच।सगर्भमाहुःसजपमगर्भंसजपंबधाः॥२४ एतद्वियोगिनमुक्तंप्राणायामस्वर
लक्षणंतु ओमितिव्याहरन्विप्रोयथाविधिसमाहितः।प्राणायामास्त्रिभिःपूतस्तत्क्षणाज्ज्व
लतेग्निवत्॥२५ यथापर्वतधातूनांदोषान्दहतिपावकः।एवमंतर्गतंपापंप्राणाया
मेनदह्यते॥२६ ब्रह्महाचसुरापश्चगुरुतल्पगएवच।सुवर्णचास्तयीचौरश्चगोघ्नोवि
श्वासघातकः॥२७ शरणागघातीचकूटसाक्षीह्यकार्यकृत्।एवमादिषुचान्येषुपा
पेष्वभिहतोनरः॥२८॥प्राणायामशतंकृत्वासूर्यस्योदयनंप्रति।निर्मलाःस्वर्गमायां ११
तिसंतःसुकृतिनोयथा॥२९ मानसंवाचिकंपापंविषयंकायकंमहत्।प्राणायामैस्तत्स्म
रणात्॥यदह्नाकुरुतेपापंकर्मणामनसागिरा।त्रिकालसंध्याकरणात्प्राणा
यामव्यपोहति॥३०॥इतिश्रीआचारदीपेप्राणायामविधिः।अथप्रातस्नानविधिः।
तत्रयोगी।प्रातर्मध्याह्नयोःस्नानंवानप्रस्थगृहस्थयोः।यतेस्त्रिषवणंस्नानंप्रो
क्तंसकृच्चब्रह्मचारिणः॥१॥व्यासः।स्नानंतुत्रिविधंप्रोक्तंमुख्यंगौणंचभेद

तः।तयोस्तुवारमुख्यंचतत्पुनःषड्विधंभवेत्॥२॥नित्यंनैमित्तिकंकाम्यंक्रियांगमलक
र्षणं।क्रियास्नानंतथाषष्ठंषोढास्नानंप्रकीर्त्तितं॥३मार्कंडेयः।अस्नातस्यक्रियाःसर्वा
ःभवंतीहाफलायतः।प्रातःसमाचरेत्स्नानंतच्चनित्यमुपस्थितं॥४॥शंखः।अस्ना
तस्तुपुमानार्होजपाग्निहवनादिषु।प्रातःस्नानंतदर्थंतुनित्यस्नानंप्रकीर्त्तितं॥५
उच्छिष्टाद्युपघातादौस्नानंनैमित्तिकंस्मृतं।चंद्रसूर्योपरागादौतथैवग्रहसूतके॥६
पुष्यस्नानादिकंस्नानंदैवज्ञविधिनोदितं।तद्धिकाम्यंसमुद्दिष्टंनाकामस्तत्प्र
योजयेत्॥७ धर्मक्रियांकर्तुमनाःपूर्वस्नानंसमाचरेत्।क्रियांगंतत्समुद्दिष्टं
स्नानंदेवपरैर्द्विजैः॥८ तथाच।जप्तुंकामःपवित्राणिअर्चिष्यन्देवतापितॄन्
स्नानंसमाचरेद्यस्तुक्रियांगंतत्प्रकीर्त्तितं॥९॥मलापकर्षणंनामस्नानमभ्यंग

Indira Gandhi National Centre for the Arts

पूर्वकं। मलापकर्षणं येव प्रवृत्तिस्तस्य नान्यथा ॥१०॥ सरस्सु देवखातेषु तीर्थे
षु च नदीषु च। क्रियास्नानं समुद्दिष्टं स्नानं तत्र मता क्रिया ॥११॥ यत्तु तीर्थादिषु स्ना
नं क्रियास्नानं प्रकीर्तितं। स्नानं देवपर्वयत्र क्रियास्नानं प्रकीर्तितं ॥१२॥ अगौणस्ना
नं क्रियास्नानं प्रकीर्तितं। स्नानं देवप.र्वयत्र क्रियास्नानं प्रकीर्तितं ॥१२॥ अगौणस्ना
नं। जाबालिः॥ असामर्थ्याच्छरीरस्य देशकालाद्यपेक्षया। मंत्रः स्नानादितः सप्त
केचिदिच्छंति सूरयः ॥१३॥ योगी याज्ञवल्क्यः॥ मांत्रं भौमं तथाग्नेयं वायव्यं दिव्यमेव
च। वारुणं मानसं चैव सप्त स्नानान्यनुक्रमात् ॥१४॥ आपोहिष्ठादिभिर्मंत्रैर्मृदालं १२
भस्तु पार्थिवं। आग्नेयं भस्मना स्नानं वायव्यं रजसा गवां ॥१५॥ अद्भिः सातपवर्षा
भिः स्नानं तद्दिव्यमुच्यते ॥ वारुणं चावगाहस्तु मानसं विष्णुचिंतनं ॥१६॥ अवगाह
स्नानमात्रं। जाबालिः। अशिरस्कं भवेत्स्नानं स्नानाशक्तौ तु कर्मिणां। आर्द्रेण वाससा वा
सा चापि मार्जनं कापिलं विदुः ॥१७॥ स्कंदपुराणात्॥ पुष्पके नखले यस्य प्रयाग

यस्य सुंदरी। तत्फलं सकलं देवि भूतिस्नाने विधियते ॥१८॥ प्रजापतिः। शन्न आपस्तु
पदाद्वा सुंदरी। तत्फलं सकलं देवि भूतिस्नाने विधियते ॥१९॥ विद्वत्सरस्व
दुपदा आपोहिष्ठाघमर्षणं। एतैश्चतुर्भिः ऋग्भिर्मंत्रैर्मंत्रस्नानमुदाहृतं ॥१९॥ विद्वत्सरस्व
तीप्राप्तं स्नानं सारस्वतं स्मृतं। गर्गः। क्रियते वा न वा यत्तु शास्त्रयंत्रणया विना। म
सव्यपोहनफलं स्नानं याद्दच्छिकं तु तत् ॥२०॥ शास्त्रं स्नाने यथोद्दिष्टं मंत्रस्नानाक्रमे
णातु। कालाद्देशाद्सामर्थ्यात्सर्वं तुल्यफलं स्मृतं ॥२१॥ जाबालिः॥ सततं प्रातरुत्था
य दंतधावनपूर्वकं। आचरेदुषसि स्नानं तर्पयेद्देवमानुषान् ॥ वसिष्ठः॥ अत्यं
तमलिनः कायो नवच्छिद्रसमन्वितः। स्रवत्येव दिवा रात्रौ प्रातःस्नानं विशोधनं
॥२२॥ अज्ञानाद्यदि वा मोहाद्रात्रौ यद्दुरितं कृतं। प्रातःस्नानेन तत्सर्वं शोधयंति हि
॥२४॥ नादेशेकेन वस्त्रेण स्नायात्कौपीनकादृते। नान्यदीयेन नार्द्रेण नस्यूत्याग्र
जातः ॥२५॥ नादेशेकेन वस्त्रेण स्नायात्कौपीनकादृते। नान्यदीयेन नार्द्रेण नस्यूत्याग्र
थितेन च ॥२६॥ मेधातिथिः॥ एकेन वाससा स्नायाद्द्याम्यामनियमः स्मृतः। बहुभि

Indira Gandhi National
Centre for the Arts

स्वप्रतिषेधः स्नानेफसमन्त्रिप्सता॥ न जलं ताडयेत्पञ्चः न जलेतु मलं त्यजेत्। मलं
ग्रहालयेत्तीरेत स्नानं समाचरेत्॥२८॥ जाबालिः स्रोतसाभिमुखो मज्जेद्यत्रापः प्र
वहंति वै। स्थावरेषु च सर्वेषु आदित्याभिमुखः सदा॥२९ वसिष्ठः। प्रातः संक्षेप
स्नानं शौचार्थं तु तदिष्यते। मंत्रैस्तु विधिना प्राघमध्याह्ने तु सविस्तरं॥३०॥ तत्राद्या
दिक्रमेण विवरणं। निषिच्य तीरं कुशापिंजुलानि प्रवेक्षिराग्राणि मदं न्यसेच्च। 13
ग्रहास्य पादौ समुखं च कंठे यज्ञोपवीतं च जलं पिबेत्त्रिः॥३१ करान्यां धारयेद्दन्नी
न शिखाबंधविधिस्ततः। प्राणायाममथर्व कुर्यात्कालज्ञानं यथाविधिः॥३२ तद्यथा॥
अद्य ब्रह्मणो द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वंतरे कलौग अमुं
रणो अमुकसंवत्सरे अमुकायने। अमुकर्त्तौ अमुकमासे अमुकपक्षे अमुकस्यां
तिथौ अमुकनक्षत्रे अमुकसंस्थे चंद्रे अमुकस्थे सवितरि अमुकस्थे देवगुरौ अ

मुकयोगे अमुककरणे एवंगुणविशिष्टे काले धरापृष्ठे जंबूद्वीपे भारते वर्षे दंडकार
ण्यपदे गोदावर्या उत्तरे कूले अमुकतीरे अमुकतीर्थे अमुकदेवसंनिधौ आत्मनः अशे
षपापक्षयार्थं श्रीवासुदेवप्रीतये प्रातःस्नानमहं करिष्ये। मृत्तिकां त्रिविधां कृत्वा भागे
नैकेन लेपयेत्। चिरत्वोदक्षिणहस्तेनाष्टौ चैतान्यनुक्रमात्॥३३ ललाटं सांसमंसोद्धू
न्यस्य मुदरं च सकुक्षितं। ततो वामकरेण च नासिकास्यूरुजंघके॥३४ दक्षिणादिक्र
मेणैव चरणौ च विलिप्य त्रिभिः। मृदस्तृतीयभागेन करौ च त्रिः प्रमार्जयेत्॥३५ तथा
चक्रचेता॥ धर्मविद्दक्षिणहस्तेनाधः शौचे नियोजयेत्। तथैव वामहस्तं तु नाभे
रूर्द्धं नियोजयेत्॥ इति सूक्ष्मं मृदा स्नानं कृत्वाचम्य जलं विशेत्। नमो नारायणेति स
ह्यवारं जपन्व्रजेत्॥३७ नाभिमात्रे जले स्थित्वा रवा केशान्विधृत्य द्विजः। निरुध्य
कस्मै नासां च त्रिः स्रो चोमार्जनं चरेत्॥३८॥ द्विराचम्याभिषेकं च कुर्यादिष्टाद्

Indira Gandhi National Centre for the Arts

रेण च। अष्टकृत्वो थ आयंगोः सूक्तेनावर्त्तयेत्पयः॥३९ ॐ बकायेति मंत्रेण विदधा
रेण च। अष्टकृत्वो थ आयंगोः सूक्तेनावर्त्तयेत्पयः॥३९ ॐ बकायेति मंत्रेण विदधा
दघमर्षणं। जपेद्वादशवारांस्तु महापापापनुत्तये॥४० ॐ बकायेति मंत्रस्य मुंडितअ
दघमर्षणं। जपेद्वादशवारांस्तु महापापापनुत्तये॥४० ॐ बकायेति मंत्रस्य मुंडितअ
दन्यऋषिः वरुणो देवता गायत्री छंदः। अघमर्षणे विनियोगः॥ अघमर्षणक्रिय
यार्धूतपाप्मा समाहितः। ततो निमज्ज्य वारांस्त्रीन् पश्चात्तर्पणमाचरेत्॥ दक्षः। नित्यं नै
मित्तिकं काम्यं त्रिविधं स्नानमुच्यते। तर्पणं तु भवेत्तस्य अंगत्वेन विधीयते॥ व्याघ्रः। १८
स्नानेषु त्रिषु सर्वत्र तर्पयेत्पितृदेवतान्। काम्ये नित्ये विशेषेण तत्का कुर्यात्प्रयत्न
तः॥ शातातपः॥ तर्पणं तु ततः कुर्यात्प्रत्यहं स्नातको द्विजः। देवेभ्यश्च ऋषिभ्यश्च
पितृभ्यश्च यथाक्रमं॥४४ कात्यायनः॥ छायां यथा छेछरातपार्त्तः पयः पिपासुः
क्षुधितो लमन्नं। बालो जनित्रीं जननी च बालं योषित्पुमांसं पुरुषश्च योषां॥४५॥
तथा सर्वाणि भूतानि स्थावराणि चराणि च विप्रादुदकमिच्छंति सर्वाभ्युदयस्य हि

स्मृतं। पितॄणामपसव्येन नम
सः॥४६ पाराशरः। सव्येन चोपवीतेन देवानां तर्पणं स्मृतं। पितॄणामपसव्येन नम
नुष्याणां निवीतिना॥४७ सत्यतपाः। देवपितृमनुष्यादीन्स्वशाखाविधिनोदनात्। ए
किकां जलिना तृप्तिः प्रथमां तेन वाचयेत्॥४८ योगी। अनामिकाधृतं हेम तर्जन्यां रूप्यमे
व च। कनिष्ठिकाधृतः खड्गस्तेन पूतो भवेन्नरः॥४९ शातातपः॥ खड्गमौक्तिकहस्तेन कर्त्त
व्यं पितृतर्पणं। मणिकांचनदर्भैर्वा न शून्येन कदाचन॥५० दक्षः। अंभस्थ एव कुर्यात्तु त
र्पणं सुसमाहितः। नार्द्रं मूले तिलैः कृत्वा नान्यत्रोक्तं मनिषिभिः॥५१ कूर्मपुराणे॥ देवा
ब्रह्मर्षींश्चैव तर्पयेदक्षतोदकैः। पितॄन्भक्त्या तिलैः कृष्णैः स्वसूत्रोक्तविधानतः॥५२
गोभिलपाराशरौ॥ शुक्लैस्तु तर्पयेद्देवान्मनुष्यांश्च यवैस्तिलैः। पितॄंश्च तर्पयेत्कृ
ष्णैस्तर्पयन्सर्वदा द्विजः॥५३ बुधः। रविशुक्रत्रयोदश्यां सप्तम्यां निशि संध्ययोः। ति
लतर्पणसंयोगात्तत्कुलं रुधिरं भवेत्॥५४ स्मृत्यंतरात्॥ छायाहे पातसंक्रांतौ अ

कात्यायनः॥ क्षयाह्निति सततर्प्पणं॥ कात्यायनः॥
सितेचाश्विनास्करे॥ नवारतिथिदोषोस्ति कुर्याच्चितिसततर्प्पणं॥ कात्यायनः॥
सितेचाश्विनास्करे॥ नवारतिथिदोषोस्ति कुर्यात्क्रियन्नत
मघायुगादौनरत्पणं तीर्थपर्वविशेषतः। तिलैस्तु तर्प्पणं दानं श्राद्धं कुर्यात्प्रयत्नत
॥५५ मरीचिः॥ मुक्तहस्तेन दातव्यं नमुद्रांतत्र दर्शयेत्। तर्जन्यंगुष्ठयोर्योगेमु
द्रेयमभिधीयते॥ तिलानामप्यलाभेतु सुवर्णरजतान्वितं तस्याभावेनिषिंचेत्तु
दर्भैर्मंत्रेणवापुनः॥५७ अनेन पितृतर्प्पणेन तिलानामावश्यकत्वान्नवति। य
तुरामायणात्स्मर्यते॥ पाद शौचमनभ्यंगं तिलहीनंचतर्प्पणं। सर्वंतत्रिजट १५
तुन्यंयज्ञश्राद्धमदक्षिणमिति॥ तत्तिलसद्भावेऽपि तद्धीनतर्प्पणाभिप्रायं॥
अन्यथामरीच्यादिवचनविरोधः॥५८ एकहस्तेनतोयेननकुर्यात्पितृतर्प्पणं।
पितरोनप्रशंसंति नप्रशंसंति देवताः॥५९ यत्तु व्याघ्रवचनं॥ उभाभ्यामपिह
हाभ्यामुदकं यः प्रयच्छति। समूढोनरकं याति कालसूत्रमवाक्शिराः॥६० एत
दन्यविषयं।

तथाचकार्ष्णाजिनिः॥ विवाहेश्राद्धकालेच पाणिनैकेनदीयते। तर्प्पणेत्वन्यथैनैवविं
धिरेषपुरातनः॥६१ यमः। द्वौहस्तौ युग्मतः कृत्वा पूरयेदुदकांजलिं। गोशृंगमात्रमुध्धृत्य
जलमध्येजलंक्षिपेत्॥६२ लिखितः। उभाभ्यामपिहस्ताभ्यामसंवृत्तांगुष्ठकाभ्यां प्रा
ङ्मुखोयज्ञोपवीती प्रागग्रैः कुशैर्दैवतातर्प्पणं॥६३ दक्षः। प्रादेशमात्रमुध्धृत्यसति
लप्राङ्मुखः सुरान्। उदङ्मुखांस्तर्प्पयेद्दक्षिणतः पितॄंस्तथा॥६४ अग्रैस्तु तर्प्पये
द्देवान्मनुष्यान्कुशमध्यतः। पितॄन्मूलाग्रैः पितॄणकुशानांतुयथाक्रमं॥६५ व्यासः।
एकैकमंजलिंदेवाद्वौद्वौतु सनकादयः। अर्हंति पितरस्त्रींस्त्रीन्स्त्रीनामेकैकमंजलिं
॥६६ सालंकायनः। मातृमुख्यास्तुयास्तिस्रस्तासां दद्याज्जलांजलीन्। त्रींस्त्रीन्तथया
स्त्वन्यास्तासामेकैकमंजलिं॥६७ ऋषिरत्रमधुछंदोगायत्री वैश्वदेवताः। विश्वेदे
वाः स इत्येषआवाहनेनियुज्यते॥६८ योगी॥ मोदाश्चैवप्रमोदाश्च सुमुखोदुर्मुखस्त
था। अविघ्नो विघ्नकर्त्ता च इत्येते षड्विनायकाः॥७०। विनायकतर्प्पणंचमाध्यंदिना

Indira Gandhi National
Centre for the Arts

ब्रह्माणं तर्प्पयेत्पूर्वं विष्णुं रुद्रं प्रजापतिं।
नामेवं सनकादीनां।योगीयाज्ञवल्क्यः॥ब्रह्माणं तर्प्पयेत्पूर्वं विष्णुं रुद्रं प्रजापतिं।तरांस्त
देवान्छंदांसि वेदांश्च ऋषींश्चैव सनातनं।आचार्यांश्चैव गंधर्वानाचार्यानितरांस्त
था।संवत्सरं सावयवं देवीप्सरसस्तथा॥तथा देवानुगान्नागान्सागरान पर्वतानपि
सरितो मनुष्यांश्च यक्षान्रक्षांसि चैव हि॥७३ पिशाचांश्च सुपर्णांश्च भूतान्यथ
पशूंस्तथा।वनस्पतीनोषधीश्च नतग्रामं चतुर्विधं॥७४ मरीचिमत्र्यंगिरसं पुल
स्त्यं पुलहं क्रतुं।प्रचेतसं वसिष्ठं च भृगुं नारदमेव च॥७५॥गोतमोथ भरद्वाजो वि
श्वामित्रोथ कश्यपः।जमदग्निर्वसिष्ठश्च अत्रिर्दक्षस्तथैव च।स्वारोचिषश्चोत्तम
श्च तामसो रैवतस्तथा॥७६ चाक्षुषश्च महातेजा वैवस्वत सुत एव च।ध्रुवो धरश्च सो
मश्चापश्चैवानिलोनलः॥प्रत्यूषश्च प्रभासश्च वसवोष्टौ प्रकीर्तिताः॥७८ अजै
कपादहिर्बुध्न्यो विरूपाक्षोथ रैवतः।हरश्च बहुरूपश्च त्र्यंबकश्च सुरेश्वरः॥७९ 16

सावित्रश्च जयंतश्च पिनाकी चापराजितः।एते रुद्राः समाख्याता एकादश सुरोत्तमाः
॥८०॥अंशुर्विवस्वान्त्वष्टा च सविता विष्णुरेव च।इंद्रो धाता भगः पूषा मित्रोथव
रुणोर्यमा॥८१॥अथ मनुष्यान्॥मनुष्याणां तथा कुर्यात्तर्पणं कंठसज्जने प्राजापत्येन ती
र्थेन तर्प्पयेत ब्रह्मणः सुतान्॥गोभिलः॥दर्भाः कृष्णाजिनं मंत्रा गावो ग्निब्राह्मणा
स्तिलाः।नैव निर्माल्यतां याति नियोक्तव्याः पुनः पुनः॥अतो देवतर्प्पणप्रयुक्तैरपि
दर्भैर्मनुष्यपितृतर्प्पणं कुर्वन्नप्रत्यवेति॥काष्र्णाजिनिः॥सनकश्च सनंदश्च तृतीयश्च
सनातनः।कपिलश्चासुरिश्चैव वोढुः पंचशिखस्तथा।एते ब्रह्मसुताः सप्त मनुष्याः
परिकीर्तिताः॥पैठीनसिः॥अपसव्यं ततः कृत्वा स्थित्वा च पितृदिङ्मुखः।पितॄन्
दिव्यानदिव्यांश्च पितृतीर्थेन तर्प्पयेत्।पितरो देवता स्त्रिष्टुप् छंदः प्रजापतिरृ
षिः।आयंतु न इति प्रोक्तः पित्रावाहनकर्मणि।इति मंत्रद्वयेनात्रावाह्याः पितरः स
दा॥८४॥कव्यवालोनलः सोमो यमश्चैवार्यमा तथा।अग्निष्वात्ताः सोमपाश्च तथा बर्हिष
दोपि च॥८५ अथ यमतर्प्पणं॥यमाय धर्मराजाय मृत्यवे चांतकाय च।वैवस्वताय कालाय

यमाय धर्मराजाय मृत्यवे चांतकाय च वैवस्वताय कालाय सर्वभूतक्षयाय च औदुंबराय दध्नाय नीलाय परमेष्ठिने वृकोदराय चित्राय
चित्रगुप्ताय वै नमः ।योगी। यदि स्याज्जीवत्पितृक एकस्मोदघात्मसंतदा। ये भ्योवापिपि
तादद्यात्तेभ्योदघात्मसंसुतः।संन्यस्तपतितपितृकविषयमेवतत्॥तथाचपराशरः।
वृद्धो तीर्थे च संन्यस्ते ताते च पतिते तथा। येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुतः॥
काष्र्णाजिनिः॥ नाभिमात्रे जले स्थित्वा चिंतयन्नूर्द्धमानसः। आगच्छंतु मे पितर इमं गृह्णंत्वपोंजलिम्॥२॥ पितृणां मंबरस्थानां मंत्रस्थाद्दक्षिणामुखः। त्रीस्त्री
न्जलांजलीन्दद्यादुच्चैरुच्चरतं बुधः॥सुमंतुः। आकाशे उत्क्षिपेद्वारि जलस्थो दक्षि
णामुखः।पितृणां स्थानमाकाशं दक्षिणा दिक् तथैव च॥योगी।मंत्रैस्तु देयमुदकं पि
तृणां प्रीतिवर्द्धने।उदीरतामंगिरस आयंतु न ऊर्जं वहंतीरित्यपि पितृभ्य इति ये चेह मधु
वाता इति त्र्यृचं। पितॄन्ध्यायन्नृगसि चेद्दैवं पन्मंत्रान्यथाक्रमं। इत्यपि चमितिन्व त्रिवै
ततः सांजलिरागतः॥नमो व इति जप्त्वा च ततो मातामहानपि। तर्पयेदानत्रास्तार्थं
धर्म...स्ममास्थितः॥उदीरतामंगिरस आयंतु न इति त्र्यृचः। पितरो देवता त्रिष्टुप् ऋषिः
शंख प्रजापतिः॥ऊर्जं वहंती प्राजापत्यर्थाक्त्वे देवता विराट्॥ पितृभ्य इति ये चेति पितरो देव
ताद्वयोः। ऋषिः प्रजापतिः पूर्वा विराट् त्रिष्टुप् तथोत्तरा। विश्वे देवा देवतास्य गायत्री छंद इ
ष्यते। ऋषिर्गौतम उद्दिष्टो मधुवाता इति त्र्यृचः। नमो वः पितृदैवत्यं प्राजापत्यार्थएव
वा गायत्री उत्तवछंदो विनियोगोस्तु तर्पणे। इत्यनेनाश्रद्दधानत्र्यमं त्रिरेभिस्तु तर्प
येत्॥पितॄणां तर्पणक्रममाह॥सत्यव्रतः।पितृभ्यः प्रत्यहं दद्यात्ततो मातृभ्य एव च।
ततो मातामहानां च पितृव्यस्यासुतस्य च॥१००॥सत्यतपाः।पितॄणां तर्पणं पूर्वं मातृ
णां तदनंतरं॥ततो मातामहानां च पितृव्यस्यासुतस्य च॥मरीचिः॥पित्रादित्रयपत्नी
नां पृथक्देयं ततोजलं। ततो मातामहानां च पितृव्यस्यासुतस्य च॥व्यासः।पितृपि
तामहाभ्यां च मातृ दद्यात्तथांजलिं पितामह्योः स्वजनेभ्यो मातामह कुले ततः॥

Indira Gandhi National Centre for the Arts

इत्याद्यनेकवचनपर्यालोचनयापित्राद्यनंतरमेवमातृमीत्तर्प्पणं॥ ततोमातामह
तर्प्पणं। स्मृत्यंतरे। अनुत्पाद्य श्रवणाद्यां नर्मतामहादीनांमातृणां यः प्रयच्छतितर्पि
णं पिंडदानंवा नरकं सउगच्छति॥ शंखः॥ पूर्वस्त्वेव शज्ञातीनांकुर्याद्दुदकतर्प्प
णं। सुहृत्संबंधिबधूनां ततः कुर्यात्तु तर्प्पणं॥ योगी। मातुलं मातृष्वसां चैव मातुला
नीं पितृष्वसां। दुहितरं स्वसारं च शिष्यर्त्विग्ज्ञातिबांधवान्॥ नामभिस्तु स्वधाकारै
स्तर्पयेदनुपूर्वशः॥ बौधायनः॥ शर्मातं ब्राह्मणस्योक्तं वर्म्मातं क्षत्रियस्य च। गुप्तां १८
तं चैव वैश्यस्य दासांतं शूद्रजन्मनः॥ चतुर्ण्णामपि वर्ण्णानां पुत्राणां पितृगोत्रतः। पि
तृगोत्रं कुमारीणामूढानां पतिगोत्रता॥ योगीश्वरः। सवर्ण्णेभ्यो जलं देयं नासवर्ण्णेभ्य
एव च। गोत्रनामस्वधाकारैस्तर्प्पयेदनुपूर्वशः॥ कार्ष्णाजिनिः। देवतानां पितॄणां च
जले दद्याज्जलांजलिं॥ असंस्कृतप्रमीतानां स्थले दद्याज्जलं पुनः॥ ११॥ तत्र मंत्रौ॥ ॥

मस्यपुराणात्॥ ये बांधवा अबांधवा अन्यजन्मनि बांधवाः। तत्तृप्तिमखिलायांतिय
श्चास्मत्तोभिवांछति॥ नरकेषु समस्तेषु यातनासु च संस्थिता। तेषामाप्यायनं देयं
सलिलं दीयते मया॥ १३॥ तथा वस्त्रनिपीडनमंत्रः॥ ये चास्माकं कुले जाता अपुत्रि त्रा
गोत्रिणो मृताः। ते गृह्णंतु मया दत्तं वस्त्रनिःपीडनोदकं॥ १४ वस्त्रशब्देन वस्त्रैक
देशो निधीयते॥ वसिष्ठः। नास्तिक्यभावाद्यस्तांस्तु न तर्पयति वै पितॄन्। पिबंति देह
निःश्रावं पितरोस्य जलार्थिनः॥ दक्षः। स्नात्वाचामेद्यदा विप्रः पादौ कृत्वा जले स्थले
।उभयोरप्यसौ शुद्धस्ततः कार्यं भवेत्तु॥ १६ स्मृत्यंतरात्। स्नानमाचमनं दा
नं जपं होमं च तर्प्पणं। भोजनं च विना दर्भैर्बर्हिर्ज्ञानुर्च निष्फलं ष्फलं॥ विकरे पिं
डदाने च तर्प्पणे भोजने तथा। कृते आचमनं प्रोक्तं दर्भं त्यागो विधीयते। कुशि
कः। पवित्रस्य तु नाशोस्ति मार्चाते पिकदाचन। पितॄणां तर्प्पणे त्याज्यमेष धर्मः स

Indira Gandhi National Centre for the Arts

नातनः ॥ व्यासः । यः स्नानवस्त्रेण मुखं विमृज्यते स्नात्वा च खादेति च दंतधावनं । अ-
न्योन्यदृष्टे न पदोपलिप्यते स्मृतो विरूपाक्ष जहाति लक्ष्मीः ॥ २० ॥ व्यासः ॥ न द्यामस्त-
मिते स्नानं वर्जनीयं सदा बुधैः । नद्यां स्नात्वा नदी चान्यां न प्रशंसेत धर्मवित ॥ २१
योगी ॥ दर्शे स्नानं न कुर्वीत मातापित्रोस्तु जीवतोः । पुत्रः कुर्वं त्रिरात्रेष्टु पुत्रार्थं कृततेजी
वितं ॥ नद्योन नस्ययो मध्ये सर्वे नद्यो रजस्वलाः । तासु स्नानं न कुर्वीत वर्जयित्वा
समुद्रगां ॥ गंगा च यमुना चैव प्लक्षजाता च सरस्वती । रजसा नाभिभूयंते ये चान्ये १२
न्ये नद संज्ञकाः ॥ योगी ॥ प्रथमं कर्कटे देवी त्र्यहं गंगा रजस्वला । सर्वा रक्तवहा
नद्यः करतोयांबुवाहिनी ॥ कर्कटादौ रजोदुष्टा गोमती वासरत्रयं । चंद्रभागा सती
सिंधुः सरयू नर्मदा तथा ॥ उपाकर्मणि चोत्सर्गे प्रेतस्नाने तथैव च । चंद्रसूर्यग्रहे
चैव रजोदोषो न विद्यते ॥ धनुः सहस्राण्यष्टौ तु गतिर्यासां न विद्यते । न ता नदी श-

ब्दवहा गर्त्तास्ते परिकीर्तिता ॥ व्याघ्रः ॥ अनावेकूपवापी नामन पायिपायोन्नतो । रजो
दुष्टे त्रिपयसि ग्रामे त्रागो न दुष्यति ॥ धनुश्चतुष्करं । प्रत्यावर्त्तादिके स्नानं वर्ज्येन द्यां द्विजा
तिभिः । तस्यां रजवतीर्थे तु दशाहस्तेन वर्जयेत ॥ योगी ॥ त्रिरात्रफ सदा नद्यो याः काश्चस
मुद्रगाः । समुद्रगास्तु पक्षस्य मासस्य सारतां पतिः ॥ मरीचिः ॥ न्द्रभिस्फु मुक्तं वापि शीतमु
ष्णमथापि वा । गांगं पयः पुनात्याशु पापमामरणांतिकं ॥ त्रिभिः सारस्वतं तोयं पंचाहेन
तु यामुनं ॥ सद्यः पुनाति गांगेयं । दर्शनादेव नार्मदं ॥ गंगादिनदीस्नानमंत्राः ॥ ब्रह्मपुरा
णात् ॥ त्र्यंबकस्य जटोद्भूते गौतमस्याघनाशिनि ॥ सप्तधा सागरं याती गोदावरि नमो
स्तु ते ॥ इह जन्मनि पूर्वस्मिन्मया यच्च दुष्कृतं कृतं । तत्सर्वं पूयतां मे तु गोदावरि नमोस्तु ते ।
इति गोदावरीनमस्कारमंत्रो ॥ पुराणात् ॥ विष्णुपादाग्रसंभूता गंगे त्रिपथगामिनि । धर्म
द्रवति विख्याता पापं मे हर जाह्नवि ॥ श्रद्धया धर्मसंपन्ने श्रीमते देवि जाह्नवि । अमृतेना
म्बुना देवि भागीरथि पुनातु मां ॥ अथ करतोयानमस्कारमंत्रः ॥ करतोये सदानीरे शि

Indira Gandhi National Centre for the Arts

रस्केछाप्ततिविश्रुते। आप्लावयसि पापौघानू पापं हर स्कंदोद्भवे॥ अथ कौशिकी॥ गाधिरा
जसुते देवि विश्वामित्रमुनेः स्वसा। ऋचीकभार्ये सत्यार्थे पापं मे हर कौशिकि॥।
वं देवि सरितां नाथ त्वं देवि सरितां वरे। उभयोः संगमे स्नात्वा मुंचामि दुरितानि
वि॥ अथ लौहित्यसमुद्रस्नानमंत्रः॥ ब्रह्मपुत्र महाभाग संतनोः कुलवर्द्धनः।
अमोघगर्भसंभूत पापं लौहित्य मे हर॥ अथ सागरस्नानमंत्रः॥ अग्निश्च तेजो
मृडया च देवा रेतोस्मा विष्णोरमृतस्य नाभिः। एतद्ब्रुवन्पांडव सत्यवाक्यं॥ २०
ततोवगाहेत पतिं नदीनां॥ आजन्म ज्ञानतः स्वयं यत्पापं कुरुते क्वचित्। मुच्य
ते सर्वपापेभ्यः स्नात्वैवं लवणांभसि॥ अथ नर्मदास्नानमंत्रः॥ तत्र मत्स्यपुरा
णे॥ आद्ये नमः पुण्यजले नमः सागरगामिनि। नर्मदे पापनिर्मोच्ये नमो देवि
वरानने॥ नमोस्तु ते मुनिगणसिद्धसेविते। नमोस्तु ते शंकरदेहनिःसृते। नमो
स्तु ते धर्म्मभृतां वरानने। नमोस्तु ते सर्वपवित्रपावने॥ जाबालिः॥ अथ तु

अहतं तद्विजानीयात्सर्वकर्मसु पावनं॥ ईषद्धौतं मरजकादिधौतमित्यर्थः। योग॥ २
व्रतादितेनार्द्रवासा नैकवासाः स्थलेजपेत्॥ नजीर्णेन न नीलेन न परिक्लिष्टेन वा जपेत्
॥३ काषायं कौशवस्त्रं च मलिनं केशदूषितं। छिन्नाग्रं चोपवस्त्रं च कुत्सितं धर्मतो विदुः॥
४॥ विष्णुपुराणे॥ होमदेवार्चनाद्यासु क्रियासु स्नानभोजने। नैकवस्त्रः प्रवर्तेत द्विजो वाच
मनेजपे॥५ शातातपः॥ सव्यादंसात्परिभ्रष्टं नाभिदेशाव्यवस्थितं। एकवस्त्रं तु तद्विद्याद्दैवे
पित्र्ये च वर्जयेत्॥६ योगी॥ अभावे धौतवस्त्रस्य पट्टस्य चाजिने तथा। कुतपं योगपट्टं वा
द्विवासा येन वा भवेत्॥७॥ उत्तरीयाभावे तु॥ धौतवस्त्रस्यार्द्धभागेनोत्तरीयं कुर्याद्यदि
नववस्त्रपरिधानसमये तस्यार्द्धभागस्य मंत्रवदुत्तरीयं कृतं नान्यथा॥ तथा च पारस्करः।
एकं चेद्वासो भवति तस्य चोत्तरवर्गेणाच्छादयीतेति॥८ जातूकर्ण्यः॥ वस्त्रस्योत्तरीयमा
वातुं ध्यंगुलं त्र्यंगुलं चतुरंगुलं वा सूत्रैर्वा वस्त्राकृति परिमंडले तदुत्तरीयं कुर्याद्वस्त्रस्य वी
वरं वा॥ ९॥ नीवीबंधस्थिता दर्भाः तथा धौतं शिरःस्थितं। उपवीतं तथा कर्णे नापवित्रं सदाद्भु

Indira Gandhi National Centre for the Arts

त्ति ॥ कटिस्पृष्टं तु यद्वस्त्रं पुरीषं येन वा कृतं मूत्रं च मैथुनं वापि न तद्वस्त्रं शुचिर्भवेत् ॥ ९ ॥ एकयो
त्ति ॥ कटिस्पृष्टं तु यद्वस्त्रं पुरीषं येन वा कृतं मूत्रं च मैथुनं वापि न तद्वस्त्रं शुचिर्भवेत् ॥ ९ ॥ एकयो-
-त्ति ॥ कटिस्पृष्टं तु यद्वस्त्रं पुरीषं येन वाकृतं मूत्रं च मैथुनं वापि नतद्वस्त्रं शुचिर्भवेत् ॥ ९ ॥ एकयो

त्ति॥कटिस्पृष्टं तु यद्वस्त्रं पुरीषं येन वा कृतं मूत्रं च मैथुनं वापि न तद्वस्त्रं शुचिर्भवेत्॥९॥एकयो
त्ति॥नोत्तरीय

ऊर्द्ध्वपुंड्रांकितो नरः॥११॥व्यासः।जाह्नवीतीरसंभूतां मृदं मूर्द्ध्नि बिभर्ति यः।बिभर्ति
रूपं सोऽर्कस्य तमोनाशाय केवलं॥१२ब्रह्मांडे।श्यामं शांतिकरं प्रोक्तं रक्तं वश्यकरं
भवेत्॥श्रीकरं पीतमित्याहुर्वैष्णवं श्वेतमुच्यते॥१३ऊर्द्ध्वपुंड्रं द्विजः कुर्याच्छत्रयस्तु त्रिपुं
ड्रकं।अर्द्धचंद्रं तु वैश्यस्य वर्तुलं शूद्रजातिषु॥१४॥उदक्याशवचांडालश्मश्रुध्यःस्वा
नदर्शनात्।दृष्ट्वा दोषो न लिप्यते ललाटे तिलकं भवेत्॥१५॥ऊर्द्ध्वपुंड्रं त्रिपुंड्रं च द्वयं वाथ २५
रये द्विजः।ऊर्द्ध्वपुंड्रे त्रिपुंड्रं स्यात् त्रिपुंड्रे नोर्द्ध्वपुंड्रकं॥१६॥इति उपाध्याय नागदेव
विरचिते आचारप्रदीपे तिलकविधिः॥अथ प्रातःसंध्याविधिः॥व्यासः॥प्रातःसंध्यां
सनक्षत्रां मध्याह्ने स्नानकर्मणि।सादित्यां पश्चिमां संध्यामुपासीत यथाविधि॥१॥अ
थाचम्य कुशैर्युक्त आसने सम्मुखस्थित करसंपुटकं कृत्वा संध्यामित्थं समाचरेत्॥ २
नत्वा यं पुंडरीकाक्षमल्पाघप्रशांतये।ब्रह्मावाप्ये प्रातरघसंध्यावंदनामुपास्महे॥३॥१

इत्थं कृत्वा तु संकल्पं कुशानादाय पाणिना।नद्यां नदीस्थतोये तु गृहे वामर्के स्थिते।त्रिर्निर्व्याहृ
ति मंत्रैस्तु प्रत्यक्षं सिंचाति स्वतः।गायत्र्यां तु ततः कुर्यादभिषेकं तु लकुलः॥५॥त्यजेद्भूर्भुवः
स्वरिति सावित्र्यां शिखां स्मृता तु।इति ब्रह्ममुखे मंत्रैरभिषिंचंति ये द्विजाः॥६ते ब्रह्मसदनं
यांति तस्मात्तैः परिमार्जयेत्॥६ व्यासः॥ॐभूर्विन्यस्य हृदये भुवः सिरसि विन्यसेत्।स्वरिति
दं शिखायां तु गायत्र्याः प्रथमं पदं॥७ विन्यस्य कवचे विद्वान् द्वितीयं नेत्रयोन्यसेत्।तृ
तीयं चास्त्रविन्यास एष न्यासो घनाशनः॥८॥अकारं नाभिदेशे तु उकारं हृदये न्यसे
त्।मकारं मूर्द्ध्नि विन्यस्य एष न्यासो विमुक्तिदः॥९॥भूर्लोकं पादयोर्न्यस्य भुवर्लोकं तु जा
नुनि।स्वर्लोकं मुरुदेशे तु जठरे तु महस्तथा।जनलोकं कंठदेशे मुखबिंबे तपस्तथा।
१०सत्यं शिरसि विन्यस्य एष न्यासो महाफलः॥दक्षः।गायत्र्याः फलदा वर्णा न्यस्ताः स्यु
:स्सर्वकर्मसु।तकारं विन्यसेत्तस्मात् पादांगुष्ठद्वये द्विजः।सकारं गुल्फदेशे तु वि
कारं जंघयोर्न्यसेत्।जानुद्वये च उकारं विकारं मुरुदेशके॥१२॥रेकारं विन्यसे

Indira Gandhi National Centre for the Arts

दुह्ये णीकारं लिंगके न्यसेत् ।यकारं कटिदेशे तु नकारं नाभिमंडले ॥१४ गोकारं जठरे
योगी देकारं स्तनयोर्न्यसेत् ।वकारं हृदये प्राज्ञः स्यकारं कंठ एव च ॥१५॥ धीकारं वदने
विप्रो मकारं तालुके न्यसेत् । हिकारं नासिकाग्रे तु धिकारं नयनद्वये ॥१६ योकारं तु
भ्रुवोर्मध्ये द्वितीयं तु ललाटके । पूर्वानने तु नःकारं प्राकारं दक्षिणानने ॥१७॥ ऽ
चोकारं पश्चिमवक्त्रे दकारं चोत्तरे मुखे । विन्यसेन्मूर्ध्नि याकारं व्यंजनं सर्वतोन्य
सेतु ॥१८॥ आपो गुह्ये न्यसेज्ज्योतिश्चक्षुष्यं रसो मुखे । अमृतं जानुनोर्ब्रह्म हृद
ये भूः पदे न्यसेतु ॥१९ भुवर्नाभौ ललाटे स्वरोंकारं मूर्ध्नि विन्यसेतु ॥ एवं रुवा
२६
शिरोन्यासं सर्वपापैः प्रमुच्यते ॥२०॥ गायत्र्याक्षरं मासे सा ह्यस्त्रकेमंडलेषु र
क्तवस्त्रा चतुर्वक्त्रा हंसवाहनसंस्थिता ॥२१ ब्रह्माणी ब्रह्मदेवत्या ब्रह्मलोकनिवा
सिनी । आवाहयाम्यहं देवीमायांतीं सूर्यमंडलात् ॥२२ ॐकारस्य ऋषिर्ब्रह्मा परमा
त्मदेवता । गायत्री च जवे छंदो । नियोगः सर्वकर्मसु ॥२३॥ व्याहृतीनां तु स

नां तु सप्तानां ऋषिर्दैवतमुच्यते । छंदो विनियोगश्च कथितो धर्मपारगैः ॥ विश्वा
मित्रो जमदग्निर्भरद्वाजोऽथ गौतम । अत्रिर्वसिष्ठः कश्यपो मुनयः सप्त कीर्तिता
ः ॥२५ योगी ॥ अग्निर्वायुस्तथादित्यो बृहस्पतिर्जलाधिपो ॥ इंद्रश्च विश्वेदेवाश्च दे
वताः समुदाहृताः ॥२६॥ गायत्र्युष्णिगनुष्टुप्बृहतीपंक्तिरेव च । त्रिष्टुप् च जगती
चैव छंदांस्येतानि सप्त वै ॥२७॥ प्राणानायमने चैव विनियोग उदाहृतः । एता
स्व व्याहृतीः सप्त यः स्मरेत्प्राणसंयमे ॥२८॥ उपासितं भवेत्तेन विश्वं भुवनसप्त
कं । तत्स वितुरित्येतस्य विश्वामित्र ऋषिः स्मृतः ॥२९॥ सविता देवता छंदो गाय
त्र्यग्निर्मुखं ततः । प्राणायामे दिके कार्ये विनियोगविधिः स्मृतः ॥३०॥ योगी ॥
ॐ आपो ज्योतिरित्येष मंत्रो वेत्तेत्तरीयके । तस्य प्रजापतिश्चार्षं यजुष्याः छंद वर्जि
तं ॥३१ ब्रह्माग्निर्वायुसूर्याश्च देवताः समुदाहृताः ॥ प्राणस्यायमने चैव विनियो
ग उदाहृतः ॥३२॥ अथो नमो भगवते वासुदेवाय मंत्रतः ॥ परिक्षिपेज्जलं मूर्ध्नः

Indira Gandhi National
Centre for the Arts

समंतात्प्राणमभ्यसेत्॥३३॥तथा च कात्यायनः॥रक्षायै द्वारिणात्मानं परिक्षयेस
मंततः।प्राणायामत्रयं कुर्यात्संध्यासु च तिसृष्वपि॥सूर्यश्चमेतिमंत्रस्य ऋषिर्नारा
यणः स्मृतः।देवः सूर्योनुष्टुप्छंदो नियोगश्चाशने मतः॥३५॥प्रातरनेन मंत्रेणाभि
निमंत्र्य जलं पिबेत्॥तथा च शौनकः।सायमग्निश्चमेत्युक्त्वा प्रातः सूर्येत्यपः पि
बेत्।आपः पुनंतु मध्याह्ने तत्राचमनमाचरेत्॥३६॥आपो हिष्ठेति सूक्तस्य सिंधु २५
द्वीपऋषिः स्मृतः।आपो वै देवता छंदो गायत्री मार्जने स्मृतं॥वैजवापायनः॥आपो २६
हिष्ठेति सूक्तेन दर्भैर्मार्जनमार्जनमाचरेत्॥यस्य क्षयायेति जलं सकृद्राक्षि
पेत्पथः॥३८ नारायणः।ऋगंते मार्जनं कुर्यात्पादांते वा समाहितः।ऋचस्यांतेथ
वा कुर्यात्तदृषीणां मतमीदृशं॥३९ ब्रह्मा।नद्यां तीर्थह्रदे वाथ भाजने मृन्मयेपि
वा।औदुंबरेथ सौवर्णे राजते दारुसंभवे॥४०॥कृत्वापो वामहस्ते वा संध्योपा
स्तिं समाचरेत्।धाराच्युतेन तोयेन मार्जनं स्याद्विगर्हितं॥पितरो न प्रशंसंति

न प्रशंसंति देवताः॥४१ सुमित्रियादुर्मित्रियायजुषी द्वे प्रजापतिः।ऋषिरापो देवताश्च
आदानक्षेपयोर्मते॥४२ सुमित्रियेति चादाय जलं दुर्मित्रियाक्षिपेत्।जलहीने स्थ
ले विप्रः शास्त्रमेष द्विषं यतः॥४३ द्रुपदायास्तु ऋषयः प्रजापत्याश्विशारदाः।देवश्चा
पोनुष्टुप्छंदः प्रक्षेपे विनियोजकः॥४४॥जलपूर्णं तु चुलकं नासिकाग्रे विधृ
त्य च प्राप्तनिःश्वस्य द्रुपदां पठित्वा तज्जलं क्षिपेत्॥४५ ऋतं च सत्यं चेत्यघमर्षण ऋषिरु
च्यते।भाववृत्तो देवोनुष्टुप्छंदः प्रक्षेपकर्मणि॥४६॥ऋतं चेति मंत्रेण सलिलं पूर्वव
त्क्षिपेत्।पश्चाज्जलैः स्पृशेन्नासां लोचनं च सकर्णकं॥४७॥योगी गृही वा पाणिना
वारिस्वशारवौक्षाम्य च जपेत्।बिभ्रयान्नासिकाग्रे तु निरुद्धः प्राणमारुतः॥४८॥
एवं तु पाव्य चात्मानं द्रुपदां वाघमर्षणं।जप्त्वा तोयं परिक्षिप्य उपस्थानं तथा पुनः
॥४९ व्यासः।कराभ्यां तोयमादाय गायत्र्या चाभिमंत्रितं।आदित्याभिमुखस्तिष्ठंस्त्रिः
क्षिपेत्संध्ययोर्द्वयोः॥५०॥मध्याह्ने तु सकृद्देवक्षेपणीयं द्विजातिभिः।उदकक्षे
पकारणमाह।काश्यपः।त्रिंशत्कोट्यो महावीरा मंदेहा नाम राक्षसाः।दंष्ट्रा दारुणा

Indira Gandhi National Centre for the Arts

वाराः सूयमिछंति खादितुं ॥५१ ततो देवगणाः सर्वे ऋषयश्च तपोधनाः । उपास
ते सदा संध्यां प्रक्षिपंत्युदकांजलिं ॥५२॥ दह्यंते तेन ते दैत्या वज्रीभूतेन वारि
णा ॥५३ तस्मात्कारणात् द्विजाः संध्यां नित्यमुपासते ॥५३॥ विष्णुपुराणे तु ॥
तस्मान्न लंघयेत्संध्यां सायंप्रातर्द्विजः सदा । उल्लंघयति यो मोहात्स याति नरकं ध्रु २७
वं ॥५४ इत्युदकप्रक्षेपकारणं ॥ पश्चाज्जपं च सावित्रीप्रदक्षिणं विवर्तनं ॥ ॐ
र्यत्रोयेन नासा चक्षुः श्रोत्रमपस्पृशेत् ॥५५ अथ सूर्योपस्थानं । स्मृत्यंतरात् । हस्त
योः स्वस्तिकं कृत्वा प्रातस्तिष्ठेद्दिवाकरं । मध्याह्ने च ऊर्ध्वबाहुः सायं मुकुलितौ करौ ।
उद्वयं तमदुत्यं च प्रस्कण्व एवात्र ऋषिः स्मृतः । देवः सूर्यस्तथानुष्टुप् गायत्र्यौ छंदसी स्मृ
ते ॥५६ चित्रं कुत्सांगिरसश्च ऋषिः सूर्योपि देवता । त्रिष्टुप्छंदश्च तच्चक्षुर्दध्यङ्ङाथ
र्वणो मुनिः ॥५८ ॥ सूर्यश्च देवता छंदः पुरोष्णिगिति ज्ञायते नियोग एषां मंत्राणामुपस्था

ने रयोर्मतः ॥५९ व्यासः । अथोद्वयं तमुदुत्यं चित्रं तच्चक्षुरित्यपि । तिष्ठेद्दिवाकरं प्रातः सा
यं मध्याह्न एव च ॥६० तेजोसीति परमेष्ठी प्रजापतिऋषिर्यजुः आज्यं देवश्च
गायत्र्या आवाहने नियोजकं ॥ तेजोसीति जपेन्मंत्रं गायत्र्यावाहने द्विजः ऋषिस्तु यस्य
विमलः परमात्मा स देवता गायत्री च भवेच्छंदो नियुक्तमोक्षकांक्षिणं ॥६१ गायत्र्ये
कपदीत्यादि गायत्र्यांप्रार्थनं चरेत् । नमस्त इति तुर्याय नमस्कृत्य जपेच्च तं ॥६२ अथ जप
लक्षणं ॥ तत्र योगी ॥ ॐकारं पूर्वमुच्चार्य भूर्भुवः स्वस्तथैव च गायत्री प्रणवश्चांते जपो हे
व उदाहृतः ॥ ध्यायेत्तु मनसा मंत्रं जिह्वोष्ठौ न विचालयेत् । न कंपयेच्छिरोग्रीवां दंतान्नैव
प्रकाशयेत् ॥६५ तत्र कारणमाह ॥ यक्षराक्षसभूतानि सिद्धविद्याधरागणाः ॥ हरंति प्र
सभं यस्मात्तस्माद्गुप्तं तु कारयेत् ॥६६ विधियज्ञाज्जपो यज्ञो विशिष्टो दशभिर्गुणैः । उपां
शुः स्याच्छतगुणः सहस्रो मानसः स्मृतः ॥६७ तत्रोपांशुमानसयोर्लक्षणं ॥ विना शब्दं

Indira Gandhi National
Centre for the Arts

जपोयस्य चलतिद्विद्विरच्छदः। उपांशुतं जपं प्राहुः मनसा मानसं बुधाः॥६८ पूर्वां संध्यां ज
पेत्तिष्ठेत्सावित्रीमार्कदर्शनात्। पश्चिमां तु समासीन सम्यगार्क्षविभावनो॥६९ अथ ज
पमालालक्षणं॥ अरिष्टपत्रजीवश्च शंखपद्मोमणिस्तथा। कुशग्रंथिश्च रुद्राक्ष उत्तमं
स्योत्त~~मोत्तमं~~। रोत्तरं॥७०॥ ब्रह्मा। अष्टोत्तरशतं कुर्याच्चतुःपंचाशिकापि वा सप्तविं
शतिका कार्या ततो नैवाधमा हिताः॥७१ अक्षुद्रां समरेखाश्च अपरिपूर्णा नवा दृढा लिग्य
लाग्रंथिता व्यंगा अन्योन्यघृष्टिवक्रिताः॥७२ सशब्दा चंचला या तु त्रुटिता ग्रंथिता
तथा। छिन्नसूत्रेषु ग्रथिता पाषाणस्था पुरातनी॥७३ माला दुःखप्रदायिन्यो ग्रंथि
तानं घतं तु पुष्टु। स्कांदे। तर्जन्यानस्पृशेत्सूत्रं कंपयेन विधूनयेत्॥ अंगुष्ठस्य उत्तम
ध्यस्थ परिवर्तं समाचरेत्॥ मध्यमाकर्षणं त्वस्याः। सर्वसिद्धिप्रदायिकं॥ नान्यां
गुलिभिराकर्षेन्न नखैस्तु तथा स्पृशेत्॥ ईश्वर उवाच॥ उच्छिष्टो वा विकर्मस्थः
संलिप्तः सर्वपातकैः। नासौ लिप्यति पापेन रुद्राक्षस्य धारणात्॥७७ रुद्राक्षं कंठआ २८

ति। २

बध्यश्वानोपि म्रियते यदि। सोपि रुद्रपदं याति किं पुनर्मनुषादयः॥७८ लक्षं तु द
र्शनेपुण्यं कोटिर्भवति वासनात्। दशकोटिसहस्राणि धारणाल्लभते फलं॥७९ लक्ष
कोटिसहस्रस्य लक्षकोटिशतस्य च। जपेन लभते पुण्यं नात्र कार्यविचारणा॥८०
अन्नावेद्यक्षमालायाः कुशग्रंथ्याथ पाणिना। जप एव हि कर्तव्य एकाग्रमनसा सदा॥
कृत्वोत्तानौ करौ प्रातः सायं वाधोमुखौ करौ। मध्यतनुकराभ्यां तु जपंन्याय उदाहृताः॥
॥८१ अथ जपगणनप्रकारः। दक्षः। अनामिकाया यो मध्यस्तस्मादधः क्रमेण तु तर्जं
न्यादौ जपांते च अक्षमाला करे स्थिता॥८२॥ अंगुल्यग्रेषु यज्जप्तं यज्जप्तं मेरुलं
घनं। असंख्येन तु यज्जप्तं तत्सर्वं निःफलं भवेत्॥८३॥ तत्र मेरुलक्षणं॥ मध्यमा
दिद्वयं पर्व जपकालेषु वर्जयेत्। एवं मेरुं विजानीयाद्दूषितं ब्रह्मणा स्वयं॥८४
अथ जपसंख्याफलश्रुतिः॥ योगी। सप्तावर्तं पुनाद्देहं दसभिः प्रापयेद्दिवं॥
अष्टावि। अष्टाविंशति सान्न्यस्तान्यते ईश्वरालयं॥ अष्टोत्तरशतं जप्त्वा तार

ये जन्मसागरात्॥८५ व्यासः॥ दशाभिर्जन्मजनितं शतेन च पुराकृतं। त्रिजन्म
जं सहस्रेण गायत्री हंति किल्बिषं॥८६ वायुर्नक्तो दिनं तिष्ठे रात्रिं नीत्वाप्सु सूर्यद
क्। जप्त्वा सहस्रं गायत्र्याः शुद्धिर्ब्रह्मवधादृते॥८७ सर्वेषां चैव पापानां संकरे स
मुपस्थिते। दशसाहस्रिको भ्यासो गायत्र्याः शोधनं परं॥८८॥ गोघ्नः पितृमातृ
घ्नो भ्रूणहा गुरुतल्पगः। ब्रह्मस्वदायहारी च यश्च विप्रः सुरां पिबेत्॥८९॥
गायत्र्याः शतसाहस्रैः पूतो भवति मानवः॥ मानसं वाचिकं पापं विषयं (का २९
यिके महाप्रायश्चित्तश्रवणात्॥ योधीते हन्यहन्येतां त्रीणि वर्षाणि मानवः। सब्रह्म
परमभ्येति वायुः पूतः समूर्तिमान्॥९१ योगी॥ तूष्णीमासीनश्च जपं चांडालप
तितादिकान्। दृष्ट्वा तान् वायुमुपस्पृश्य भाष्य स्नात्वा वा विशुद्ध्यति॥९२ अथ जपनि
षेधः। गोभिलः॥ नोदकस्थो जपेदार्द्रो गायत्रीं वेदमातरं। अग्नित्रयमुखीय
स्मात्तस्मादुत्थाय तां जपेत्॥९३॥ नार्द्रवासा जपं कुर्याद्धोमं दानं प्रतिग्रहं॥

सर्वं तद्राक्षसं विद्याद्बहिर्जानु च यत्कृतं॥९४ न पादापादमाक्रम्य नचैव हि तथा करौ
न वासमाहितमना न च संश्रावयं न जपेत्॥९५ न चंक्रमन्न च हसन्न पार्श्वमवलोक
यन्। न पोथितो न जल्पं वै न च प्रावृतशिरास्तथा॥९६ बृहस्पतिः। मनःसंहरणं शौचं मौ
नं मंत्रार्थचिंतनं। अव्यग्रत्वमनिर्वेदो जपसंपत्तिहेतवः॥९७॥ अथ गायत्रीप्रशंसा। यो
जी। गायत्रीं यो न जानाति वृथा तस्य परिश्रमः। एकतश्चतुरो वेदा गायत्री चैकतः समाः
॥ न तथा वेदजापेन पापं निर्दहति द्विजः। यथा सावित्रीजाप्येन सर्वपापैः प्रमुच्यते॥९९
गायत्रीमात्रसारोऽपि वरं विप्रः सुयंत्रितः। नायंत्रितश्चतुर्वेदाः सर्वाशी सर्वविक्रयी॥
१००॥ विश्वतश्चक्षुरित्यृषिर्भौमनाथो देवता। विश्वकर्मा त्रिष्टुप् छंदः उपस्थाने विनियोगः।
॥१०१ इत्युक्त्वा ऋषिछंदो विश्वकर्मेतश्चक्षुरित्यृचं। जप्त्वा प्रदक्षिणां कुर्यादेकं चक्रमि
ति द्विजः॥१०२ उपविश्यासने पश्चात्कुर्यात्संपुटितौ करौ। देवा गातुविदिति मंत्रस्य मनसस्प
ति रुद्रः ऋषिः॥१०३॥ वातो देवा विराट् छंदो योगो जपविसर्जने। करे नीरं समादाय दे

निवेदयेत्तपं पूर्णोऽप्रयोगस्तत्र कथ्यते।प्रातःसंध्यागन्तूतेनगाय
वागाविति मंत्रतः॥४ निवेदयेत्तपं पूर्णोऽप्रयोगस्तत्र कथ्यते। सविवेनमइत्युच्चा।गाय
त्रीजपतेनवा।साष्टेनशतत्रीखयेन अत्मात्मासीयनांरविः॥५सविवेनमइत्युच्चा।गाय
त्रीजपतेनवा।साष्टेनशतं त्रिंशखेन अक्षात्मासीयतांरविः॥६यदक्षरमितिसाध्य
त्र्येकपदीतिवा।उपस्थायचगायत्रीन्भूर्भुवःस्व विसर्जयेत॥७अंगिराःजप

त्र्येकपदीतिवा।उपस्थायचगा।यत्रीन्भूर्भुवःस्वविसर्जयेत॥७अंगिराःजप
संध्यां देवी।ज्ञेद्विजोत्तमः।उत्तरे शिखरेत्यादिपठित्वातां विसर्जयेत॥९
होमप्रदानेषुपितृपिंडोदकेषुच।समाप्तेष्वामेद्विजः सर्ववस्तुषुन्यता॥१
पूर्ववच्चषडंगानिन्यस्यप्रातरश्मिमान्।सूर्यप्रजापतिभ्यांच नमउच्चाजलंक्षिपेत्
१०॥आचारावार्यवर्येणनागनाथेनधीमता।बद्धः संध्याविधिःश्लोकैः श्लोकैःसंज्ञिप्यगृह्य
तां॥११गद्यैः संध्याविधिंवक्ष्मिद्विसूनांसुखबुद्धयेनपुनरुक्तताघोषरांकाका॰
र्यविचक्षणैः॥१२ॐपुंडरीकाक्षायनमः।उपात्तदुरितक्षयार्थं ब्रह्मावाप्त्यै प्रातःसं
ध्योपासनमहंकरिष्ये॥१३अथाभिषेकमंत्रः।ॐभूः ॐभुवः ॐस्वः ॐभूर्भुवःस्वःतत्स
वितुर्वरेण्यंभर्गोदेवस्यधीमहि।धियोयोनःप्रचोदयात्।ततउदकंॐभूर्भुवःस्व

तत्सवि॰
रितिभुविप्रक्षिपेत्।ॐतत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहि।धियोयोनःप्रचोद
यात्।इतिशिखास्पर्शनं॥अथषडंगन्यासः।ॐभूःहृदयं।ॐभुवःशिरः।ॐस्वः
शिखा।ॐतत्सवितुर्वरेण्यंकवचं।भर्गोदेवस्यधीमहिनेत्रे।धियोयोनःप्रचोदया
त्अस्त्रं।अथप्रणवन्यासः॥अकारंनाभौ।उकारंहृदये।मकारंमूर्ध्नि।अथव्या
हृतीन्यासः।ॐभूःपादौ।ॐभुवोजानुनी।ॐस्वःऊरौ।ॐमहःजठरे।ॐजनःहृदये।
ॐतपःमुखं।ॐसत्यंशिरः॥अथगायत्रीन्यासः।ॐतकारंपादांगुष्ठयोः।ॐस
कारंगुल्फयोः।ॐविकारंजंघयोः।ॐतुकारंजानुनोः।ॐवकारंऊर्वोः।रेकारंगुदे।
णीकारंलिंगे।यकारंकट्यां।भकारंनाभौ।गोकारंउदरे।दकारंस्तनयोः।वकारं
हृदि।स्यकारंकंठे।धीकारंमुखे।मकारंतालुदेशे।हिकारंनासिकाग्रे।धिकारं
नेत्रत्रयोः।योकारंभ्रूमध्ये।द्वितीयोकारंललाटे।नकारंपूर्वमुखे।
प्रकारंदक्षिणमुखे।चोकारंपश्चिममुखे।दकारंउत्तरेमुखे।यकारंमूर्ध्नि॥

Indira Gandhi National Centre for the Arts

व्यंजनतकारं सर्वव्यापि। अथ शिरन्यासः॥ ॐ आपो गुह्यं। ज्योतिश्चक्षुषी। रसो
वक्त्रं। अमृतं जानुनी। ब्रह्म हृदये। भूः पादयोः। भुवः नाभौ। स्वर्ललाटे। ॐकारं
मूर्ध्नि न्यसेत्। अथ आवाहनं। गायत्रीमुदारां बालां साक्षसूत्रकमंडलुं। सक्ष•
रक्तवस्त्रां चतुर्वक्त्रां हंसवाहनसंस्थितां। ब्रह्माणीं ब्रह्मदेवत्यां ब्रह्मलोकनिवा
नीं। आवाहयाम्यहं देवीमायातीं सूर्य• मंडलात्। ॐकारस्य ब्रह्मा ऋषिः परमात्मा
देवता गायत्रीछंदः। सर्वकर्मारंभे विनियोगः॥ सर्वकामार्थ व्याहृतीनां विश्वामित्र ३०
जमदग्नि भरद्वाज गोतमात्रि वसिष्ठ कश्यपाः। अग्निर्वायुसूर्य बृहस्पति वरुण
इंद्र विश्वदेवा देवताः॥ गायत्र्युष्णिगनुष्टुप्बृजगत्य छंदांसि तत्सवितुर्वरेण्यं भर्गो
देवस्य धीमहि धियो यो नः प्रचोदयात् इति विश्वामित्र ऋषिः सविता देवता गायत्रीछंदः।
आपो ज्योतिः प्रजापतिः। ब्रह्माग्निर्वायुसूर्याः। अनुष्टुप्। प्राणायामे। ॐ नमो वास्तु

देवायेत्यात्मनः प्रदक्षिणमुदकं क्षिपेत्॥ ॐ भूः ॐ भुवः। ॐ स्वः। ॐ महः। ॐ जनः। ॐ तपः।
ॐ सत्यं। ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्। ॐ आपो
ज्योतिरसोऽमृतं ब्रह्म भूर्भुवः स्वरोमिति॥ प्राणायामत्रयं कुर्यात्। सूर्यश्च मेति ना
रायण• सूर्योनुष्टुप् प्राशने। सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पा
पेभ्यो रक्षंतां। यद्रात्र्या पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना
रात्रिस्तदवलुंपतु यत्किंचिद्दुरितं मयि। इदमहमाममृतयोनौ सूर्ये ज्योतिषि जुहो
मि स्वाहा। ततो द्विराचमनं। आपो ह्यापः सिंधुद्वीप ऋ गायत्रं मार्जनं। आपो हि
ष्ठा मयोभुवस्तान ऊर्जे दधातन। महेरणाय चक्षसे। यो वः शिवतमो रसस्तस्य
भाजयतेह नः। उशतीरिव मातरः। तस्मा अरंगमाम वो यस्य क्षयाय जिन्वथ
आपो जनयथा च नः॥ इत्युदकप्रक्षेपः। सुमित्रियादुर्मित्रिया यजुषी। प्राजापत्ये
अंबुदेवत्ये आदानप्रक्षेपयोः॥ सुमित्रिया न आप ओषधयः संतु दुर्मित्रियास्तस्मै

Indira Gandhi National Centre for the Arts

संतुयोस्मांद्वेष्टि यं च वयं द्विष्मः॥ द्रुपदादिवेति प्रजापत्य[र्षि]सरस्वत्यापोनुष्टुप् ग
ह्नेपः। द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव पूतं पवित्रेणेवाज्यमा
पः शुंधंतु मैनसः॥ ऋतं च सत्यं चेत्यस्याघमर्षण ऋषिर्भाववृत्तो देवता अनु
ष्टुप् छंदः अघमर्षणे॥ ऋतं च सत्यं चाभीद्धात्तपसोध्यजायत ततो रात्र्यजायत ततः स
मुद्रो अर्णवः समुद्रादर्णवादधि। संवत्सरो अजायत। अहोरात्राणि विदधद्विश्व
स्य मिषतो वशी सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयत्। दिवं च पृथिवीं चांतरि ३१
क्षमथो स्वः॥ ताता गायत्रीमंत्रेण सूर्यायार्घत्रयं। उदकेन दक्षिणाना सावद्दुः
स्पर्शः॥ उद्वयमुदुत्यं प्रस्कण्वः सूर्योनुष्टुप् गायत्र्यौ। चित्रं कुत्स आंगिरसः।
सूर्यस्त्रिष्टुप् तच्चक्षुर्दध्यङ्ङाथर्वणः सूर्यः पुरउष्णिगुपस्थाने। उद्वयं तमसस्प
स्वः पश्यंत उत्तरं देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमं। उदुत्यं जातवेदसं देवं व

हंति केतवः दृशे विश्वाय सूर्यं॥ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्या
ग्नेः। आप्रा द्यावापृथिवी अंतरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च॥ तच्चक्षुर्देवहितं
पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतं ।
प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं। भूयश्च शरदः शतात्॥ तेजोसी
ति परमेष्ठी प्रजापतिः। आज्यं देवत्यं यजुः आवाहने। तेजोसि शुक्रमस्यमृतमसि
धामनामासि प्रियं देवानामनाधृष्टं॥ तुरीयपदस्य विमल ऋषिः परमात्मा देवता गा
यत्री छंदः मोक्षविनियोगः॥ ॐ गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदसि न
हि पद्यसे नमस्ते तुरीयाय दर्शताय पदाय परोरजसे सावदोम्। अपदिति। ततो गाय
त्रीजपः। ॐ भूर्भुवः स्वः ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्॥
विश्वतश्चक्षुरुत भौवनो विश्वकर्मा देवता त्रिष्टुप् उपस्थाने। ॐ विश्वतश्चक्षुरुत विश्वतोमुखो
विश्वतोबाहुरुत विश्वतस्पात्। संबाहुभ्यां धमति संपतत्रैर्द्यावाभूमी जनयन् देव ए

Indira Gandhi National Centre for the Arts

कः॥ ततः प्रदक्षिणा। एकचक्रं रथो यस्य दिव्यं कनकभूषितं। स मे भवतु सुप्रीत पद्मह
स्तो दिवाकरः॥ देवा मनसस्पतिर्वातो विराड्विसर्जने॥ देवा गातुविद [illegible] ।वित्त्वागा
तुमित मनसस्पत इमं देवयज्ञं स्वाहा वाते धाः॥ अनेन अष्टोत्तरसंख्यावे ज
पत्रीजपेन प्रातःसंध्यां गच्छतेन श्रीभगवान् ब्रह्मस्वरूपी सविता प्रीयतां॥ ॐ स
वित्रे नमः॥ गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुःपद्यपदासि न हि पद्यसे।
नमस्ते तुरीयाय दर्शताय पदाय परोरजसे। ततो गायत्रीविसर्जनं। ॐ म ३२
र्भुवःस्वरित्स्व दक्षप्रक्षेपः। ततः संध्यां प्रार्थयेत्। यदक्षरपदभ्रष्टं मा
३२ त्राहीनं तु यद्भवेत्। तत्सर्वं क्षम्यतां देवि कश्यपप्रियवादिनि॥ ततः सं
ध्याविसर्जनं। उत्तमे शिखरे देवि भूम्यां पर्वतमूर्द्धनि। ब्राह्मणेभ्योऽभ्यनु
ज्ञाता गच्छ देवि यथासुखं। इति उदप्रक्षेपः। ततः श्रोत्राचमनं। ततः पूर्वव
त्षडंगन्यासः। ततो जपहोमः॥ ॐ सूर्याय नमः। ॐ प्रजापतये नमः॥

वत्पूर्वकं ते नमभिभाषेत धर्मवित्॥९ आपस्तंबः॥ स्वदक्षिणं बाहुं श्रोत्रसमं प्रसा
र्य ब्राह्मणोऽभिवादयेत्। उरःसमं राजन्यो मध्यसमं वैश्यो नीचैः शूद्रः प्रांजलिः सर्वत्र
॥मनुः॥ भोःशब्दं कीर्तयेदंते स्वस्य नाम्नोऽभिवादयेत्। नाम्नः स्वरूपभावो हि भोःशब्द
ऋषिभिः स्मृतः॥ ॥८ तत्र प्रयोगः। अभि इति भगवान् विष्णुर्वादयामीति शंकरः। क
संपुटयो भानुः शिरो ब्रह्मा प्रणम्यते॥९ अभिवादये चैत्रनामाहमस्मि भो इति॥
आयुष्मान् भव सोमेति वाच्यो विप्रोऽभिवादने। अकारश्चास्य नाम्नोंते वाच्यः पूर्वाक्षर
प्लुतः॥१०॥ अकारग्रहणं स्वरोपलक्षणार्थो वसिष्ठं। आमंत्रिते स्वरोंत्योस्य प्लुतवते
ध्यक्षरं प्रगृह्यं। आ३ इ आ३ उ भावं चेति तथा च पाणिनिसूत्रात्॥ एचो प्रगृह्यस्या
दूराद्धूते पूर्वस्यार्द्धस्यादुत्तमस्येदुता। विति तत्रैकं क्रमेण अत्यभिवादप्रयोगः॥
आयुष्मान् भव सोम्य यज्ञदत्ता३ हरा३ विष्णो३॥ ७। मनुः॥ अविद्वांस प्रत्यभिवादे
नाम्नोंत्ये न प्लुतिं विदुः कामं तेषु विप्रेषु स्त्रीषु वा युव देत्॥११॥ यो न वेत्त्यभिवाद

Indira Gandhi National Centre for the Arts

स्य विप्रः प्रत्यभिवादनं नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः ॥ यमः । अभिवाद्य
स्तु यो विप्रः आशिषं न प्रयच्छति । श्मशाने जायते वृक्षः काकगृध्रस्य सेवितः ॥ १३ ॥
शातातपः ॥ उदक्यां सूतिकां नारीं भर्तृघ्नीं गर्भपातिनीं । अभिवाद्य द्विजो मोहाद्दहो
रात्रेण शुध्यति ॥ १४ पाषंडं पतितं व्रात्यं महापातकिनं शठं । सोपानत्कं कृतघ्नं च ना
भिवादेत्कदाचन ॥ १५ ॥ धावंतं च प्रमत्तं च मूत्रोच्चारकृतं तथा । भुंजानमाचमना
र्हं नास्तिकं नाभिवादयेत् ॥ १६ ॥ वमंतं जृंभमाणं च कुर्वंतं दंतधावनं । अभ्यक्त
शिरसं चैव स्नातं नैवाभिवादयेत् ॥ १७ शंखः । एतदभिवादके पि द्रष्टव्यमभिवा ३८
द्योऽर्कं द्विजोत्तमैः ॥ जमदग्निः ॥ देवतां प्रतिमां दृष्ट्वा यतिं दृष्ट्वा त्रिदंडिनं । नमस्कारं
न कुर्याद्येसा प्रायश्चित्ती भवेन्नरः ॥ १८ ॥ मनुः । अभिवादनशीलस्य नित्यं वृद्धोपसेवि
नः । चत्वारि तस्य वर्द्धंते आयुः प्रज्ञा यशो बलं ॥ २० ॥ इति उपाध्याय नागदत्तविर
चिते आचारप्रदीपे अभिवादनविधिः ॥ अथ होमः ॥ तत्र दक्षः ॥ संध्याकर्मावसा

ने तु स्वयं होमो विधीयते । स्वयं होमे फलं यत्तु तदन्येन न लभ्यते ॥ १ ॥ होमे यत्फलमु
द्दिष्टं उद्धृतः स्वयमेव च । हूयमाने तदन्येन फलमर्द्धं प्रपद्यते ॥ २ ऋत्विक्पुत्रो गुरुर्भ्राता
भागिनेयोथ विट्पतिः । एतैरपि हुतं यच्च तद्धुतं स्वयमेव तु ॥ ३ ॥ विघातिर्भ्राता ॥
तथा च श्रुतिः । अन्यैः शतकृताद्धोमादेकं शिष्यकृतो वरं । शिष्यैः शतकृताद्धोमा
देवं पुत्रकृतो वरं । पुत्रैः शतकृताद्धोमादेको ह्यात्मकृतो वरं ॥ तस्मात्सदैव होमं तु
प्रकुर्वीत स्वयं द्विज इति ॥ ४ ॥ कात्यायनः । असमक्षं तु दंपत्योर्होतव्यं न । व त्विगा
दिना । द्वयोरप्यसमक्षं तु हि भवेद्धुतमनर्थकं । निक्षिप्याग्निं स्वदारेषु परिकल्प्यर्त्वि
जं तथा । प्रवसेत्कार्यवान्विप्रो वृथैव न चिरं वसेत् ॥ ६ यावन्नापैति तिलो हिं त्यं तावत्सा
यं तु हूयते ॥ याव ॥ प्रातः सूर्योदयात्पूर्वं प्रायश्चित्तमतः परं ॥ ७ पूर्णिमासात्यये ह
व्यं होतव्यं यदहर्भवेत् । तदहर्जुहुयाद्देवममावास्यात्ययेपि च ॥ ८ मरीचिः ॥ शरीर
पतनं वे यत्र भयाद्यत्र प्रजायते । तथान्यास्वपि चापत्सु होमो विधीयते ॥ ९ ॥

Indira Gandhi National
Centre for the Arts

अनाकुरोगवासी च निश्चिंता निरुपद्रवः। पक्षहोमं यो दद्यात्स चरेत्पतितव्रतं॥१०
पक्षहोमं प्रकुर्वीत प्रवसंन्नग्निमान्यदि। पञ्चयज्ञविधानं तु लौकाग्नौ विधीयते॥११
परेणाग्नौ कुरुते स्वार्थं परस्याग्नौ कुरुते स्वयं। पितृयज्ञात्यये चैव वैश्वदेवद्वयस्य च॥१२॥ अ
निष्ठानवयज्ञेन नवान्नप्राशने तथा। इष्टीविधानं री कुर्यात् एकाग्नेस्तु चरुः स्मृतः॥१३
पक्षहोमानथादत्वा गृहात स्मान्निविवर्तितः। होमं पुनः प्रकुर्यात न चाग्नौ दोषजायते॥
१४॥ प्रवासिनाग्निहोत्रीय स्त्रिपंचाहस्य सप्तवा। दातव्यो होम एकाहे सायंप्रातः पृथक्पृथक्॥१५
कात्यायनः॥ कृतमोदनसक्त्वादि तंदुलादि कृताकृतं। व्रीह्यादि कृतं प्रोक्तमिति हव्यं त्रिधा बुधैः॥ ३९
१६ स्मृत्यंतरात्॥ हविष्यान्नं तिला माषा नीवारा व्रीहयो यवाः। इक्षवः शालयो मुद्गाः पयो द
धि घृतं मधु। हविष्येषु यवा मुख्याः तदनु व्रीहयः स्मृताः॥ अभावे व्रीहियवयोः दध्ना वाप
यसापि वा॥१८ यथोक्तवस्त्वसंपत्तौ ग्राह्यं तदनुसारि वा॥ यवानामिव गोधूमा व्रीहीणामि
शालयः॥१९ बृहस्पतिः। प्रसूतं धान्यं वत्सु षष्टिरात्रैः परिकीर्तितं। तिलानां तु तदर्हस्य

तदर्हस्याद्धुतस्य तु॥ बौधायनः। व्रीहीणां वा यवानां वा ग्रहणमाकृतिरिष्यते। इति तत्रा
युक्रमः। आदौ प्राणायाममत्र यं कृत्वा उक्तस्य परमेश्वरप्रीतये प्रातर्होमं करिष्ये॥१
तत्र सूर्यं प्रजापतिं अमुकद्रव्येणाहं होष्ये। उपयमनान्कुशानादाय तिष्ठन्समिधो न्या
धाय चेपयुक्तपुष्पादिनान्यर्च्य जुहुयात्। सूर्याय स्वाहा इदं सूर्याय। प्रजापतये
स्वाहा इदं प्रजापतये। विभ्राडित्यनुवाकजपं कृत्वाथवा ब्रह्मयज्ञं कुर्यात्। तातान्निदंप
तीनमः। कुर्यात्। प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्। स्मरणादेव तद्विष्णोः संपू ६ख
र्णस्यादिति श्रुतिः॥२१ विदध्याद्देवतापूजां प्रातर्होमादनंतरं। स्थंडिले प्रतिमायां वा वे
कोवाद्भ्ये पि वा॥२२॥ इति श्री आचारदीपे प्रातर्होमविधिः। अथ नित्यदानविधिः। याज्ञ
वल्क्यः॥ दातव्यं प्रत्यहं पात्रे निमित्तेषु विशेषतः। याचितेनापि दातव्यं श्रद्धापूतं तु
शक्तितः॥१ गोभूतिलहिरण्यादि पात्रे दातव्यमर्चितं। नापात्रे विदुषा किंचित् आत्म
नश्रेय इच्छता॥२ न विद्यया केवलया तपसा वापि पात्रता। यत्र वृत्तमिमे चोभे तद्धि

Indira Gandhi National
Centre for the Arts

तिस्य: क्रियापरा:श्रो
पात्रं प्रकीर्त्तितं ॥३ सर्वस्य प्रभवो विप्राः श्रुताध्ययनशालिनः। तेभ्यः क्रियापराः श्रेष्ठा
ष्ठाः तेभ्यो ह्यध्यात्मवित्तमाः ॥४ अर्द्दीयासा ध्यते धर्ममिहद्भिर्नार्थराशिभिः। अकिंचे
नास्तु मुनयः श्रद्धावंतो दिवंगताः ॥५ तत्र तावद्ब्राह्मणपाणिं कृत्वा कालज्ञानपूर्वकं सं
कल्पं विधाय। दानं दद्यात् ॥ तद्यथा शिवा आपःसंतु। सौमनस्यमस्तु। अक्षतं चा
रिष्टं चास्तु यद्दुष्कृतं तद्दस्तु। यत्पापं तत्प्रतिहतमस्तु। इतिपठित्वेमं मंत्रमुच्चारये ४०
त् ॥ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः। अनंतपुण्यफलदमतः शांतिं प्र
यच्छ मे। अमुकसगोत्र: अमुकप्रवर: अमुकशर्मा। अमुकगोत्राय अमुकप्रवरा
य कस्मै विद्वान्ब्राह्मणाय इमं हिरण्यं निष्क्रयमहं संप्रदास्ये ॥ याज्ञवल्क्यः ॥ हेमशृं
गी शफै रूप्यैः सुशीला वस्त्रसंयुता सकांस्यपात्रा दातव्या क्षीरिणी गौः सदक्षि
णा ॥१ गवामंगेषु तिष्ठंति भुवनानि चतुर्दश। यस्मात्तस्माच्छिवं मेस्यादिहलोके प
मत्स्यपुराणे द्रव्यं सौवर्णिकं शृंगे खुराः पंचपलान्विताः पंचाशत्पलिकं कांस्यं दोहनं
पितथैव च ॥

कपिलाचोत्तारय
रत्र च ॥२ गोदानमंत्र ॥ दातास्याः स्वर्गमाप्नोति वत्सरान् रोमसंमितान्। कपिला चेत्तारय
तिभूयश्चासप्तमं कुलं ॥३ यथाकथंचिद्दत्वा गां धेनुं वाऽधेनुमेव वा। अरोगामपरिक्लिष्टां द
त्वा स्वर्गे महीयते ॥४ मनुः ॥ यथा चंद्रमसो वृद्धिरहन्यहनि वर्द्धते। तथा भूमिकृतं दानं
सस्ये सस्ये प्रवर्द्धते ॥५ इषुभिः संस्कृतां भूमिं यवगोधूमशालिनीं। अन्नयानुलभंते लोको
न्यो ददाति वसुंधरां ॥६ तत्र मंत्रः। ब्रह्मांडपुराणे। सर्वभूताश्रिता भूमिर्वराहेण समु
द्धृता। अनंतसस्यफलदा अतः शांतिं प्रयच्छतु ॥ स्वदत्तां परदत्तां वा यो हरेत वसुंधरां।
षष्टिवर्षसहस्राणि विष्टायां जायते कृमिः ॥८ मनुः। तिलान्ददाति संस्तौति तिलान्ख्या
दति जुह्वति। तिलान्स्पृशति यः स्नाति स सर्वं तरति दुःकृतं ॥ तत्र मंत्रः ॥ माघकल्पे ॥ मासः
तिलाः पापहरा नित्यं विष्णोर्देहसमुद्भवाः। सुवर्णहरदेहोत्थं अतः पापं व्यपोहतु ॥१०
तिलपात्रदानमंत्रः। संवर्त्तः। सुखवासं तु यो दद्यात् शीतवातविवर्जितं। कल्याणी सुभ
गोनाग्नी सुखी चैव स दाता भवेत् ॥१२ हर्म्याच्छादनैर्धान्यभूषणैर्येन कल्पितां स्वान
दानाकृपा ह्यमात्रेन षष्टीं शामाहरेत् ॥१ तत्र ब्रह्मांडपुराणे। इदं गृहं गृहाण वस

Indira Gandhi National Centre for the Arts

र्वोपस्करसंयुक्तं तव विप्रप्रसादेन ममास्त्वभिमतं फलं॥ग्रहदानमंत्रः।कामधेनोस
मद्भूतं सर्वक्रतुषु संस्थितं देवानामाज्यमाहारमतः शांतिं प्रयच्छतु॥१४ आज्यदानमं
त्रः। यो गृहस्थः। दीपाश्वान्नवस्त्रान्न तिलसर्पिः प्रतिश्रयान्। नैवेशिकं स्वर्णधुर्य
दत्वा स्वर्गे महीयते॥१५ ग्रह धान्यासनोपानच्छत्रमाल्यानुलेपनं। यानं वृक्षं प्रियं शय्यां
दत्वात्यंतसुखी भवेत्॥१६ पाराशरः॥ तपः परं कृतयुगे त्रेतायां ज्ञानमेव च। द्वाप
रे यज्ञमित्याहुः दानमेकं कलौ युगे॥१७ सौरिपुराणे॥ न दानादधिकं किंचिद्
दृश्यते भुवनत्रये। दानेन प्राप्यते स्वर्गः श्रीर्दानेनैव लभ्यते॥१८ पुराणान्तु॥ वाचया ४
यत्प्रतिज्ञातं कर्मणा नोपपादितं। तद्धनं ऋणमित्याहुः इहलोके परत्र च॥१९ प्रतिश्रु
ताप्रदानेन दत्तापहरणेन च। जन्मप्रभृति यत्पुण्यं तत्तु दत्तो देव नश्यति॥२० आ
शाकारं मदातारं दातुश्चप्रतिबंधकः। दत्वा तु तत्पातः पश्चात्तमाहुर्ब्रह्मघातकं॥२१॥
सप्त पूर्वान् परान् हन्यात् कर्तमानास्तु सप्त चाग्रजातान् सप्त वै हन्याद्दत्वाच्छिन्नप्रतिश्रुतं॥



२२ इति नित्यदानविधिः। अथ मंगलावेक्षणविधिः। तत्र दक्षः। देवकार्यं ततः कृत्वा गु
रुमंगलवीक्षणमिति। वामनपुराणे तु। होमं च कृत्वालंभनं शुभानां ततो बहिर्निर्गम
नं प्रशस्तं। दूर्वां च सर्पिर्दधिसर्षपांश्च सोदकुंभं धेनुं सवत्सामृषभं सुवर्णं॥१ मृद्गोम
यं स्वस्तिकमक्षताश्च लाजं मधु ब्राह्मणकन्यकाश्च श्वेतानि पुष्पाणि तथा शमीं च हुता
शनं चंदनमर्कबिंबं॥२ अश्वत्थवृक्षं च समालभेत ततस्तु कुर्यान्निजजातिधर्मं॥३
कात्यायनः॥ पापिष्ठं दुर्भगं मत्यं नग्नमुत्कृत्तनासिकं। प्रातरुत्थाय यः पश्येत् स आपद्भ्यः
सप्रमुच्यते॥४ श्रोत्रियं सुभगां गामग्निं ग्राममग्निचितमेव च प्रातरुत्थाय यः पश्येत्
आपद्भ्यः स प्रमुच्यते॥५॥ नारदः। लोकेस्मिन् मंगलान्यष्टौ ब्राह्मणो गौर्हुताशनः
हिरण्यं सर्पिरादित्यः आपो राजा तथाष्टमः॥६॥ एतानि सततं पश्येन्नमस्येदर्चयेत्तु
यः। प्रदक्षिणं च कुर्वीत तथास्यायुर्न हीयते॥७ इति आचारप्रदीपे मंगलावेक्षणवि
धिः। अथ अध्ययनविधिः। तत्र दक्षः॥ द्वितीये च तथा भागे वेदाभ्यासो विधीयते॥

Indira Gandhi National Centre for the Arts

वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः ॥ १ तद्दानं चैव शिष्येभ्यो वेदाभ्यासो हि
पंचधा ॥ तत्रादौ आर्षादि कथ्यते ॥ ऋग्वेदस्य अग्निऋषिः गायत्री छंदः आदि
त्यो देवता अध्ययने विनियोगः ॥ योगी । गुरुं चैवाप्युपासीत स्वाध्यायार्थं समा
हितः । आहूतश्चाप्यधीयीत लब्धं चास्मै निवेदयेत् ॥ ४ हितं तस्याचरेन्नित्यं
मनोवाक्कायकर्मभिः । वर्जयेन्मधुमांसादीन् सर्वभोगविवर्जितः ॥ ५ दंडाजिनो
पवीतानि मेखलां चैव धारयेत् । ब्राह्मणेषु चरेद्भैक्षमनिंद्येष्वात्मवृत्तये ॥ ६ ४२
आदिमध्यावसानेषु प्रणवं छंदोपलक्षितं । ब्राह्मणक्षत्रियविशां नैतच्च यथा
क्रमं ॥ ७ पाणिनिः । हस्तेन वेदं योऽधीते स्वरवर्णार्थसंयुतं । ऋग्यजुःसामभिः पू
तो ब्रह्मलोके महीयते ॥ हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितं । ऋग्यजुःसामभि
र्दग्धो वियोनिमधिगच्छति ॥ ८ ॥ इति वेदस्वीकारः ॥ पाराशरः ॥ ज्ञातव्यः सर्वथैवा

र्थो वेदानां कर्मसिद्धिः पाठमात्रावसायां च पंके गौरिव सीदति ॥ १० ॥ व्यासः । वेदस्या
ध्ययनं पूर्वं धर्मशास्त्रस्य चिंतनं । अज्ञानतोऽर्थतः सर्वं तु पानां कंठनं यथा ॥ ११
इति विचारः । योऽनधीत्य द्विजो वेदानन्यत्र कुरुते श्रमं । स जीवन्नेव शूद्रत्वमा
शु गच्छति सान्वयः ॥ १२ ॥ योगी । यज्ञानां तपसां चैव शुभानां चैव कर्मणां । वेद
एव द्विजातीनां निःश्रेयसकरः परः ॥ १३ इत्यभ्यासः ॥ यं यं क्रतुमधीयीत तस्य
स्याप्नुयात्फलं । त्रिर्वित्तपूर्णः पृथिवीदानस्य फलमश्नुते ॥ १४ इति जपः । लिंग
पुराणे ॥ यथाग्निसंपर्कान्मलं त्यजति कांचनं । तथैव गुरुसंपर्कात्पापं त्यज
ति मानवः ॥ १५ मनुः । गुरोर्वचनतिं रुचा वेदाध्ययनमारभेत् । अध्यापयेत्ततः
शिष्यान्न्यायशीलगुणान्वितान् ॥ १६ याज्ञवल्क्यः । कृतज्ञाद्रोहिमेधाविशुचिक
ल्यानसूयकाः । अध्याप्या धर्मतः साधुशक्ताप्तज्ञानवित्तदाः ॥ १७ न निंदाताडने
प्पा१

कुर्यात पुत्रं शिष्यं च ताडयेत्। अधोभागे शरीरस्य नोत्तमांगेन वक्षसि॥१८॥ अतोन्य
था तु प्रहरन्न्याय्यमुक्तो न्तेन्नरः। सर्वधर्ममयं ब्रह्मप्रदानेभ्योधिकं यतः॥१९ तद्दद
ल्लभमवाप्नोति ब्रह्मलोकमविच्युतं॥ उशना। अयने विषुवे चैव शयने बोधने त
था। अनध्यायं प्रकुर्वीत मन्वादिषु युगादिषु॥२० उद्धे प्रेते ह्यनध्याय शिष्यर्त्विग्
गुरुबंधुषु। उपाकर्मणि चोत्सर्गे स्वशाखाश्रोत्रिये तथा॥२१ संध्यागर्जितनिर्घात   ४२
भूकंपोल्कानिपातने। समाप्य वेदं द्युनिशामारण्यकमधीत्य च॥२२ पंचदश्यां चतु
र्दश्यामष्टम्यां राहुसूतके। ऋतुसंधिषु भुक्त्वा च श्राद्धिकं प्रतिगृह्य च॥२३ पशुमंडु
कनकुलश्वाहिमार्जारमूषकैः। कृतेंतरे त्वहोरात्रं शक्रपाते तथोच्छ्रये॥२४ खरो
ष्ट्रगर्दभोलूकश्यामवाणार्त्तिनःस्वने। अमध्यशवशूद्रांत्यश्मशाने पतितांतिके।
२५ देशोऽशुचावात्मनि च विद्युत्स्तनितसंप्लवे। भुक्त्वार्द्रपाणिरंभोंऽतरर्द्धरात्रेतिमारुते।

पांशुवर्षे दिशां दाहे संध्यानीहारभीतिषु। धावतः पूतिगंधे च शिष्टे च गृहमागते॥२६॥
खरोष्ट्रयानहस्त्यश्वनौवृक्षेरुगिरोहणे। सप्तत्रिंशदनध्यायानेतांस्तात्कालिकान्विदुः
॥२७ रात्रौ यामद्वयादर्वाक् यदि पक्षद्वयेऽपि यो दश। प्रदोषः स तु विज्ञेयः सर्वशास्त्रविवर्जितः
२८ षष्ठी च द्वादशी चैव अर्द्धरात्रेन वनाडिका। प्रदोषमवधीयीत तत्ततीयानवनाडिका॥२९
गुरुमाराध्य यत्नेन विद्या व्याख्या यथा रजेः। शास्त्रया प्रमाणेन विद्या। विद्यादानं समारभेत्॥
कस्तेन सदृशो लोके बांधवो भुवि विद्यते। यस्य वाग्रश्मिर्वदेन्न च पतेत तमः॥३२ स चास्य
व्याधिदुःखेषु मत्स्येष्वप्रीतिकृद्भवेत्। प्रसादयेत्तु कुपितं दुःखमग्नं समुद्धरेत्॥३३ भ्रातरु
च्छाययो वेदं वेदांगमपि पाठयेत्। पृथिवीदानतुल्यं स्यात्फलं तस्य न पोतमः॥३४॥ शास्त्रं
व तु हि लोकानां स्वर्गमार्गप्रकाशकं। शास्त्रेण धार्यते विश्वं त्रैलोक्यं सचराचरं॥३५॥ ये
जनास्सहस्रेपि वर्षकोटिशतेन च। सघस्तिरोहितं वस्तु शास्त्रं दर्शयति ध्रुवं॥३६॥ वेद
विद्यां नरो दत्वा स्वर्गं कल्पत्रयं वसेत्। दशामंन्मतरान्मत्यस्तारयेन्नरकात्पितॄन्॥३७

Indira Gandhi National
Centre for the Arts

सन्मात्रेभ्यः श्रुतदघात विशेषाङ्गुलशालिषु। उपयोग्यं च यद्यस्य तत्तस्य प्रतिपाद
येत्॥३ अप्रस्तुतकथापेक्षयः कुर्याद्यत्नो गुरोः। स ब्रह्महत्यामाप्नोति गुरुवाक्येषु नि
स्वयेः॥३२ यस्य श्रुत्वान्यतः शास्त्रं संस्कारं प्राप्य वा श्रुतं। अन्यस्य तनये कीर्तिमगुरोश्च
सहान्वयेत्॥४० विस्मारयेच्च यो मोहाद्वेदशास्त्रार्थमुत्तमं। स याति नरकं घोरमद्वयं वे
नसंशयः॥ वेदाभ्यासरतं क्षान्तं महायज्ञक्रियापरं। न स्पृशन्ति पापानि महापातक
जान्यपि॥४१॥ इति॥ अध्ययनविधिः। अथ योगक्षेमः विधिः। तत्र दक्षः। तृतीये च तथा
भागे पोष्यवर्गार्थसाधनमिति। याज्ञवल्क्यः॥ उपेयादीश्वरं चैव योगक्षेमार्थसिद्धये॥ ४४
न स्वाध्यायविरोध्यर्थमीहेत न यतस्ततः॥१ मनुः। यात्रामात्रप्रसिद्ध्यर्थं स्वैः कर्मभिरग
र्हितैः। अक्लेशेन शरीरस्य कुर्वीत धनसंचयं॥२ सप्त वित्तागमा धर्म्या दायो लाभः क्रयो
जयः। प्रयोगकर्मयोगश्च सत्प्रतिग्रह एव च॥३ अध्यापनमध्ययनं यजनं याजनं त
था। दानं प्रतिग्रहश्चैव षट् कर्माण्यग्रजन्मनः॥४ षण्णां तु कर्मणामस्य त्रीणि कर्माणि

जीविका। याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः॥ याज्ञवल्क्यः॥ प्रधानं क्षत्रिये कर्म
प्रजानां परिपालनं। कुसीदं कृषिवाणिज्यं पाशुपाल्यं विशां स्मृतं॥६ ऋतामृताभ्यां जी
वेत्तु मृतेन प्रमृतेन वा। सत्यानृताभ्यामपि वा न श्ववृत्त्या कथंचन॥७ ऋतमुञ्छशिलं
ज्ञेयममृतं स्यादयाचितं। मृतं तु याचितं भैक्ष्यं प्रमृतं कर्षणं स्मृतं॥८ सत्यानृतं तु वा
णिज्यं तेन चैवापि जीव्यते। सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्जयेत्॥ याज्ञवल्क्यः॥
कुशूलकुम्भीधान्यो वा त्र्यहिकोऽश्वस्तनोऽपि वा। जीवेद्वापि शिलोञ्छेन श्रेयानेषां परः परः॥
१०॥ पाराशरः। अतः परं गृहस्थस्य कर्माचारं कलौ युगे। सम्प्रवक्ष्याम्यहं पूर्वं पाराश
रप्रचोदितं॥११ षट्कर्मसहितो विप्रः कृषिकर्म समाचरेत्। स्वयं कृष्टे तथा क्षेत्रे
धान्यैश्च स्वयमार्जितैः॥१२ निर्वपेत्पञ्चयज्ञांश्च क्रतुदीक्षां च कारयेत्। अष्टगवं
धर्म्यहलं षड्गवं जीवितार्थिनां॥१३ चतुर्गवं नृशंसानां द्विगवं ब्रह्मघातिनां॥१३

Indira Gandhi National
Centre for the Arts

पाराशरः॥हीनाङ्गं व्याधितं क्लीवं वृद्धं विप्रो न वाहयेत्।वाहयेद्दिवसस्यार्द्धं पश्चात्स्ना
नं समाचरेत्॥१४ कूर्म्मपुराणे।देवेभ्यश्च पितृभ्यश्च दद्याद्भागं च विंशकं।त्रिंशद्भाग
तु विप्राणां कृषिकृन्न दोषभाक्॥१५ पाराशरः।यो न दद्याद्द्विजातिभ्यो राशिमूल
मुपागतान्।स चोरः स तु पापिष्ठो ब्रह्मघ्नं तं विनिर्दिशेत्॥१६ मनुः। वरं स्वधर्म्मो वि
गुणो न पारक्यः स्वनुष्ठितः।परधर्मेण जीवन्हि सद्यः पतति जातितः॥१७ संतोषं परम
स्थाय सुखार्थी संयतो भवेत्।संतोषमूलं हि सुखं दुःखमूलं विपर्ययः॥१८ व्यासः
।सन्तुष्टः को न शक्नोति फलमूलैश्च वर्त्तितुं।सर्वस्त्विंद्रियलौल्येन संकटान्यवगाहते।
दरिद्रास्त्वास्तताराज्यं तथेन्द्रत्वं तथा क्षये।पदं वा सति नातोस्ति तस्मात्तृष्णां परित्यजे ४५
त्॥२० यमः।यस्तु याचनिको नित्यं न स स्वर्गस्य भाजनं।उद्वेजयति भूतानि यथा चौ
रः स्तथैव सः॥ व्यासः।विद्यमाने धने यस्तु प्रतिग्रहरुचिर्द्विजः।नरके रौरवे प्राप्य त
त्रैव परिपच्यते।वर्षविंशतिमतात्॥२२ सीदंश्चेद्विप्रलौल्येन संकटान्यवगाहते॥

मा
यथोहयं॥४० फलोपलक्षौमसोममनुष्यापूपवीरुधः।तिलोदनरसक्षारदधिक्षीरंघृतंज
लं॥शस्त्रासवमधूच्छिष्टमधुलाक्षाथबर्हिषः।मृच्चर्मपुष्पकुतपकेशतक्रविषक्षितीः
॥कौशेयनीलीलवणमांसैकशफसीसकान्।शाकार्द्रौषधिपिण्याकपशुगंधांस्तथैवच
॥४२ वैश्यपरस्यापि जीवन्नो विक्रीणीत कदाचन॥यमः।स्नेहद्रव्यरसानां च सर्वानाजी
वतामपि।विक्रेतदानपुण्यानां ... ब्राह्मणो बुधैः॥४३ गवां निक्रयकारिणां गवा
... मनुः।भोजनाभ्यंजना
रोमाणि यानि तु तावद्वर्षसहस्राणि गावो ... कृमिभिर्वितुः॥४६ रस
दानाद्धन्यः कुरुते तिलैः।कृमिभूत्वाथ विष्ठायां पितृभिः सह मज्जति॥४६ रस
रसैर्निमातव्यान त्वेव लवणं रसैः।कृतान्नं वाकृतान्नेन तिला धान्येन तत्समाः॥
अंगिराः।व्याधितस्य दरिद्रस्य कुटुम्बात्प्रच्युतस्य च।अध्यानं वा प्रवृत्तस्य लि
अंगिराः।व्याधितस्य दरिद्रस्य कुटुंबात्प्रच्युतस्य च।अध्यानं वा प्रवृत्तस्य
... विधानेन
दावर्यं विधीयते।तथैव सप्तमे भक्तं भक्तानि षडनश्नता।अधस्तन विधानेन
हर्त्तव्यं हीनकर्मणः॥४९ धान्यमिति विशेषः।तत्र मनुः।वानस्पत्यं मूलफलं दार्व

थतथैवचतृणंगोभ्योग्रासार्थमस्तेयंमनुरब्रवीत्॥५०व्यासः।प्रतिग्रहरुचिर्न
स्याद्यात्रार्थंतमाहरेत्।स्थित्यर्थादधिकंगृह्णन्।ब्राह्मणोयात्यधोगति॥५१इतियोग
क्षेमविधिः॥अथमध्याह्नस्नानविधिः।तत्रदक्षः।चतुर्थेचतथाभागेस्नानार्थंमृ
दमाहरेत्।तिलपुष्पकुशादीनिस्नानंचाकृत्रिमेजले॥१॥व्यासः।स्नानंमध्यंदिनेकु
र्यात्सुजीर्णेननिरामयः।नभुक्त्वालंकृतोभोगीनाज्ञाताम्भसिनजले॥२योगी
प्रभूतेविद्यमानेतुउदकेसुमनोहरे।नाल्पोदकेद्विजःस्नायान्नदीवोत्सृज्य
कृत्रिमे॥३आयुर्वेदात्॥स्नानंमर्दितनेत्रास्यकर्णरोगातिसारिषु।आध्मा ४६
नपीनसाजीर्णभुक्तवतांचगर्हितं॥४व्यासः।मंत्रपूतैर्जलैःस्नानंप्राकृस्ना
नफलप्रदं॥नरथावारिमग्नानां।यादृशामित्यसत्तमाः॥५योगी।अथस्ना
नविधिंसम्यक्प्रवक्ष्याम्यनुपूर्वशः।येनस्नातादिवंयांतिश्रद्दधाना॥द्वि
द्विजोत्तमाः॥६मृत्तिलान्गोमयंदर्भान्पुष्पाणिसुरभीणिच।आहरेत्स्नानका

यस्तुयात्प्रतिगृह्णीयात्ब्राह्मणेभ्यस्तथान्नपान्।ततस्तुवैश्यशूद्रेभ्यःशांखस्यैववचनय
थाः॥२३याज्ञवल्क्यः।राज्ञांतेवासियाज्येभ्यःसीदन्निच्छेद्धनंक्षुधा।दंभिहैतुकपाष
ण्डिबकवृत्तींश्चवर्जयेत्॥२४नराज्ञःप्रतिगृह्णीयाल्लुब्धस्योच्छास्त्रवर्तिनः।प्रतिग्रहेसू
निचक्रिध्वजीवेश्यानराधिपः॥२५दुष्टादशगुणंपूर्वापूर्वादेतेयथाक्रमं॥२६यमः।नथै
वराजमहाश्रीराजामात्यपुरोहिताः।पापेनार्थेनसंयुक्ताःसर्वेतेराजधर्मिणः॥२७याज्ञव
ल्क्यः।विद्यातपोभ्यांहीनेनतुग्राह्यःप्रतिग्रहः।गृह्णन्प्रदातारमधोनयत्यात्मानमेव
च॥२८देवलः।याजनीयान्नसंबंधंस्वाध्यायंसहभोजनं।कृत्वासद्यःपतत्येवपतितेन
सहायः॥२९उशनाः।पतिताद्द्रव्यमादायभुक्त्वावाब्राह्मणोयदि।कृत्वातस्यसमुत्सर्गः
मितिकृच्छ्रंचरेद्द्विजः॥२९याज्ञवल्क्यः।अयाचिताहृतंग्राह्यमपिदुष्कृतकर्मणः।अन्यत्र
कुलटाषंढपतितेभ्यस्तथाद्विषः॥३०मनुः।शय्यांगृहान्कुशान्गंधानपःपुष्पंमणीन्
दधिधानामत्स्याःपयोमांसंशाकंचैवननिर्णुदेत्॥३१चिकित्सकस्यमृगयोर्वेश्यायाः

Indira Gandhi National
Centre for the Arts

कितवस्यच । खटस्तृतिकयोरेवउपघातमपिवर्जयेत् ॥ याज्ञवल्क्यः । प्रतिग्रहसमर्थोऽ
पिनादत्ते यः प्रतिग्रहं । येलोकादानशीलानांसतानाप्नोतिपुष्कलान् ॥ २३ इति
प्रतिग्रहाधिकारनिरूपणं ॥ ॥ अथापद्वृत्तयः । बृहस्पतिः ॥ कुसीदकृषिवाणिज्यं प्र
कुर्वीतस्वयंकृतं । कृषिरन्नावेवाणिज्यंतद्भावेकुसीदकं ॥ २५ कर्म्मशरणं ॥ बृह
स्पतिः । अजीवंस्वकर्म्मणास्वेनविप्रः क्षात्रंसमाश्रयेत् वैश्यकर्माथवाकुर्याद्दूषितं
परिवर्जयेत् ॥ कुसीदंवृध्यर्थंधनप्रयोगः ॥ यमः । समर्थंपणमादायमहर्घंयःप्रय ४७
ति । सवैवार्द्धुषिकोनामसर्वब्रह्मस्वप्रयोजयेत् । मनुः । ब्राह्मणः क्षत्रियोवापिवृद्धिं
नैवप्रयोजयेत् । कामंतुखलुधर्मार्थंदद्यात्पापीयसेऽल्पिकां ॥ ३० याज्ञवल्क्यः । अशी
तिभागोवृद्धिःस्यान्मासिमासिसबन्धके । वर्णक्रमाच्छतंद्वित्रिचतुःपंचकमन्यथा
॥ ३१ कांतारगास्तुदशकंसामुद्राविंशकंशतं । दद्युर्वास्वकृतांवृद्धिंसर्वेसर्वासुजा
तिषु ॥ ३२ हीनजातीपरिक्षीणंऋणार्थंकर्मकारयेत् । ब्राह्मणस्तुपरिक्षीणःशनैर्दाप्यो